—^{a}) Da हन्त्यंति (for हन्तीति). —^{b}) $K_{2.4}$ निहंतीति; Da_1 हन्त्यंत्यपि (for हन्तीत्यपि). M_4 [अ]थ (for [अ]पि). $K_{3.5}$ V_1 B D (except D_1) चापरः. —^{c}) D_1 नियतो; D_8 निहतौ. T_2 एव स्वभावो नियतो. —^{d}) $M_{1.3}$ प्रभवाव्ययौ; Ca as in text.

17 =(var.) B. 12. 174. 7. 17^{ab} = 12. 174. 6^{ab}. —^{a}) K_3 D_4 पुत्रे (for दारे). Da नष्टधानेव (Da_2 नष्टाधाने च) दारे वा. —^{b}) K_3 D_4 दारे (for पुत्रे). —^{c}) K_1 अहं (for अहो). $K_{2.3}$ V_1 B Da Dn $D_{2.3.5-8}$ दुःखम् (for कष्टम्). B_2 Da T_1 G M_3 ध्यात्वा (for ध्यायन्). —^{d}) V_1 $Bo._{1.3-5}$ Dn $D_{2.3.5.6.8}$ T_1 G $M_{1.3}$ दुःखस्य; D_1 corrupt (for शोकस्य). $M_{1.3}$ [अ]पचितिश्. Da_1 शोकशापचितं चरेत्.

18 ^{a}) B_2 Da D_7 S कथं (T_2 अथ) (for स किं). B_2 Da $D_{4.7}$ S (except M_1) मुह्यसि (D_7 $G_{1.3.4}$ °ति) (for शोचसि). B_2 Da संमूढः. —^{b}) V_1 शोच्य; B_1 T_2 शोच्यं; Dn_2 $D_{2.3.5.6.8}$ शोच्यान्; D_1 corrupt. K_1 छोश्य(*inf. lin.* °च्य)न्न मुह्यति (corrupt). —K_1 om. 18^{cd}. —^{c}) K_2 V_1 $D_{4.6}$ यस्य (for पश्य). D_8 om. दुःखेषु. D_7 S transp. दुःखेषु and दुःखानि. B_2 Da दुःखेन (for दुःखेषु). —^{d}) B_2 भयेन (for भयेषु). T_1 $G_{3.4}$ $M_{2.3}$ [अ]ति-; G_1 [इ]ति; G_2 $M_{1.4}$ [अ]पि (for च). $Ś_1$ K_5 च (for [अ]पि). —After 18^{b}, K_1 reads 20^{ab}.

19 = (var.) B. 12. 174. 14^{abcd}: B. 14. 32. 11^{c}–12^{b}. —^{a}) D_6 om. [अ]पि. D_7 मनसा (for न मम). Ca cites 19^{a} as in text. —K_3 om. 19^{b}. —^{b}) V_1 B Da_1 D_{2-6} S वा; Da_2 om.; D_7 च (for [अ]पि). —^{c}) G_2 यथा (for तथा). $G_{3.4}$ ह्येषां (for [अ]न्येषां). —^{d}) T_2 मुह्यसि. Ca cites 19^{d} as in text.

20 = 3. 2. 15: B. 11. 2. 22: B. 12. 174. 40; 330. 2: B. 18. 5. 61; Hitopadeśa I. 2. K_1 reads 20^{ab} after 18^{b}. —^{b}) V_1 B ($B_{3.4}$ both marg.; also as in text) S (except G_1) भय- (for हर्ष-).

21 = (var.) B. 12. 174. 48. —^{a}) $K_{2.4}$ एषाम् (for एवम्). —^{b}) K_4 -द्वेषानि; $B_{3.4}$ $D_{3.5}$ -द्वेष्यानि; $D_{4.8}$ द्वेषाणि; G_4 -प्रेष्याणि (for -द्वेष्याणि). B_4 (marg.) $D_{2.3.5}$ भागतः; B_4 भारत (for भागशः). —^{c}) K_4 ते येषु (for जीवेषु).

22 ^{a}) D_1 सुखे (for सुखं). —D_1 om. 22^{b}–23^{c}. —^{b}) $Bo._{1.3}$ (m as in text).$_4$ $D_{2.3.5.8}$ यद् (for तद्). $B_{2.3}$ (marg.) -लभ्यसे; B_3 -लक्षते; D_5 -लक्ष्यते. —22^{cd} = B. 12. 174. 18^{ab}. —^{c}) D_7 तृष्णार्त-; Ca as in text. D_4 -प्राभवं. —^{d}) K_1 $D_{2.3.8}$ दुःखांत- (for दुःखार्ति-).

23 ^{ab}) D_1 om. 23^{abc} (cf. v. l. 22). K_3 om. 23^{ab}. D_4 om. 23^{a}. After 23^{b}, Da_2 ins. 34*. 23^{ab} = 3. 247. 45^{ab}: B. 12. 174. 19^{ab}. Da_2 D_4 om. (hapl.) 23^{c}–24^{d}. —^{cd}) = B. 12. 174. 20^{cd}. D_7 अनित्यं (for न नित्यं in both places).

24 Da_2 D_4 om. 24 (cf. v. l. 23). K_4 om. 24^{b}. —For 24^{ab}, $K_{3.5}$ V_1 B Da_1 Dn $D_{2.3.5.6-8}$ S subst.:

33* सुखमेव हि दुःखान्तं कदाचिद्दुःखतः सुखम् ।

[$Bo._{4.5}$ सुखमेवेह; Dn_1 दुःखमेव हि. $B_{4.5}$ दुःखात्तु; D_7 दुखांतः. M_2 कदापि. T_1 G दुःखिनः. K_8 सुतां (for सुखम्.)]

—^{c}) K_4 त्यज (for जह्याद्). —K_4 om. 24^{d}. —^{d})

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 756
B. 12. 25. 25
K. 12. 25. 25

आयासो वापि यन्मूलस्तदेकाङ्गमपि त्यजेत् ॥ २५
सुखं वा यदि वा दुःखं प्रियं वा यदि वाप्रियम् ।
प्राप्तं प्राप्तमुपासीत हृदयेनापराजितः ॥ २६
ईषदप्यङ्ग दाराणां पुत्राणां वा चराप्रियम् ।
ततो ज्ञास्यसि कः कस्य केन वा कथमेव वा ॥ २७
ये च मूढतमा लोके ये च बुद्धेः परं गताः ।
त एव सुखमेधन्ते मध्यः क्लेशेन युज्यते ॥ २८
इत्यब्रवीन्महाप्राज्ञो युधिष्ठिर स सेनजित् ।
परावरज्ञो लोकस्य धर्मवित्सुखदुःखवित् ॥ २९
सुखी परस्य यो दुःखे न जातु स सुखी भवेत् ।
दुःखानां हि क्षयो नास्ति जायते ह्यपरात्परम् ॥ ३०
सुखं च दुःखं च भवाभवौ च
लाभालाभौ मरणं जीवितं च ।
पर्यायशः सर्वमिह स्पृशन्ति
तस्माद्धीरो नैव हृष्येन्न कुप्येत् ॥ ३१
दीक्षां यज्ञे पालनं युद्धमाहु-
र्योगं राष्ट्रे दण्डनीत्या च सम्यक् ।
वित्तत्यागं दक्षिणानां च यज्ञे
सम्यग्ज्ञानं पावनानीति विद्यात् ॥ ३२
रक्षन्राष्ट्रं बुद्धिपूर्वं नयेन

Da1 यद् (for य). Bo शाश्वतः सुखं; D7 S भूतिमात्मनः. — B2 Da1 ins. after 24: Da2 after 23^{ab} (cf. 22^{cd}):

34* सुखान्तप्रभवं दुःखं दुःखान्तप्रभवं सुखम् ।

25 = (var.) B. 12. 174. 43. — a) Ś1 K5 V1 B Da Dn1 D2. 3. 5. 6 T2 G2 यन्निमित्तो. — b) K4 तपो. Ś1 K1. 3–5 D1. 4 भृशदारुणः; B1. 3 (m as in text). 4 D3. 5. 6 दुःखमूर्जितं; Da दुःखमूर्तिजं; D7 S दुःखमेव वा. — c) Da आयामो; M4 आयसो. Ś1 D7 T1 G3 वा यतोमूलं; K4 Da D1. 4 T2 G1. 2. 4 वा यतो(D4 °हो)मूलस्; B2 वापि यतोमूलस् (hypermetric). — d) D1 तदैकांगम्; D4 तदेकांतम्.

26 = B. 12. 174. 39. — b) K1 द्वेष्यता; K4 द्वेष्यं वा (for प्रियं वा). — c) V1 Bo. 1. 3–5 D2. 3 5. 8 प्राप्तकालम्; D4 प्राप्तप्राप्तम्. D7 T G [अ]वि(D7 °पि)दूयता (for [अ]पराजितः).

27 a) K5 अप्यथ; M1. 3 अव्यंग. Ca cites अङ्ग (as in text). V1 रामाणां (for दाराणां). — b) K4 B Da (Da1 both times) D5. 7. 8 S वा(D5 T2 चा)चरन्प्रियं; K5 V1 Dn D6 आ(Dn1 अ)चरन्प्रियं; D2. 3 च चर°. — After 27^{ab}, Da1 repeats 26^{c}–27^{b}. — c) T2 M4 ज्ञास्यति. — d) Dn M1 च (for the second वा).

28 = B. 12. 174. 33. — a) Da मूढतमो; Ca as in text. — b) K5 T2 परां गताः; G1 पराहताः. — d) K2 मध्ये; D1 मान्यः; M [ऽ]प्यन्यः (for मध्यः). K5 क्लिश्यंतरितो जनः (sic); V1 B Dn D2. 3. 5. 6. 8 मध्यमः क्लिश्यते जनः. Ca cites मध्यमः.

29 d) T1 G स राजा; M1. 3 [अ]धर्मवित् (for धर्मवित्). T2 प्राणिनां चैव धर्मवित्.

30 a) D1 सुखे (for सुखी). Ś1 K1 दुःखी (for दुःखे). K3. 5 Bo. 1. 4. 5 D2–5. 8 येन दुःखेन यो दुःखी; V1 B2. 3 Da Dn D4. 6. 7 S Cv पर(G3 परं)दुःखेन यो दुःखी. — b) K3. 5 Dn D4. 6 transp. जातु and स. M1. 3 न (for स). D7 भवे. — c) D1 वा (for हि). — d) G1 जायेत. B2 ह्यपराभवं; Da T1 G2. 4 M2. 4 °परं; Dn1 D7 G1. 3 M1. 3 °वरं; T2 हि परं परं.

31 Cf. 5. 36. 45. = (var.) 6. 36. 46. — a) V1 भयाभयौ. — b) D6 जीवनं (for जीवितं). — c) K3. 5 B2–4 Dn D2. 3. 5. 6 T G पर्यायतः (D6 °सः). K3. 5 D4 सर्वं (for सर्वम्). K3. 5 Bo. 2. 3. 5 Da D2–5. 8 S इहाप्नुवंति; V1 B4 Dn D6. 7 अवाप्नुवंति; B1 इ*प्नुवंति; D1 corrupt. — d) B5 वीरो; D1 धीरे (for धीरो). K3 न; D4 न च (for नैव). K1 हृष्टे (for हृष्येन्). K3. 5 D4 कुप्येन्न हृष्येत् (by transp.). V1 Bo. 1. 3–5 Dn D2. 3. 5. 8 शोचेत्; D1 कुप्यत् (for कुप्येत्). B2 Da तस्मान्मु(B2 °स्मान्न मु)ह्येन्न प्रहृष्येत्कदाचित्; D7 S तस्मान्न मुह्येन्न च संप्रहृष्येत्.

32 a) V1 Dn1 दीक्षा. K2 V1 B Dn D2. 3. 5. 6. 8 S राज्ञः; K3 Da D4. 7 राज्ञां; K5 राज्ञे (for यज्ञे). K4 पालने. K2. 3. 5 V1 Bo. 1. 3–5 Dn D2–8 S संयुगे; Da राष्ट्रं; T1 G धर्मम् (for युद्धम्). — b) K4 राष्ट्र-; Dn राज्ये. K1–3. 5 V1 Bo. 1. 3. 4 (m as in text). 5 Dn D4 दंडनीत्यां; B2 Da D7 S °नीतिं (M1. 2 °तिम्). K4 नित्य- — c) K3 B Da Dn D2. 3. 5–8 वित्तत्यागो; K4 नित्यत्यागं; M1. 3 चित्तत्यागं. Dn2 D7 S दक्षिणां (D7 °णा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संत्यक्तात्मा यज्ञशीलो महात्मा ।
सर्वाँल्लोकान्धर्ममूर्त्या चरंश्चा-
प्यूर्ध्वं देहान्मोदते देवलोके ॥ ३३
जित्वा संग्रामान्पालयित्वा च राष्ट्रं
सोमं पीत्वा वर्धयित्वा प्रजाश्च ।
युक्त्या दण्डं धारयित्वा प्रजानां
युद्धे क्षीणो मोदते देवलोके ॥ ३४
सम्यग्वेदान्प्राप्य शास्त्राण्यधीत्य
सम्यग्राष्ट्रं पालयित्वा च राजा ।
चातुर्वर्ण्यं स्थापयित्वा स्वधर्मे
पूतात्मा वै मोदते देवलोके ॥ ३५
यस्य वृत्तं नमस्यन्ति स्वर्गस्थस्यापि मानवाः ।
पौरजानपदामात्याः स राजा राजसत्तमः ॥ ३६

इति श्रीमहाभारते शान्तिपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

२७

युधिष्ठिर उवाच ।
अभिमन्यौ हते बाले द्रौपद्यास्तनयेषु च ।
धृष्टद्युम्ने विराटे च द्रुपदे च महीपतौ ॥ १
वसुषेणे च धर्मज्ञे धृष्टकेतौ च पार्थिवे । C. 12. 800 B. 12. 27. 2 K. 12. 26. 2

चैव (Dn_2 ये च; D_7 चैष). — ^{d}) $K_{2.3.5}$ B D_{2-5} दानं; Da_1 ज्ञाने; D_7 त्राणां; G_2 त्राणं (for ज्ञानं). D_1 विद्या; D_2 विंद्यात्; T_2 विद्वान्.

33 ^{a}) G_3 सम्यग् (for रक्षन्). D_1 धाष्ट्र (sic) (for राष्ट्रं). K_1 D_4 बुद्धिपूर्वं. — ^{b}) $K_{4.5}$ D_1 बुद्धि-; B_2 Da युद्ध- (for यज्ञ-). — ^{cd}) $K_{2.5}$ V_1 $B_{0.2.3.5}$ Da_2 Dn $D_{2.3.5-8}$ S धर्मदृष्ट्या; B_4 damaged; Da_1 धर्मं दृष्ट्वा. K_4 चरेच्चापि; B_1 D_4 चरं चापि; B_2 Da_2 चरंश्च; B_4 damaged; Da_1 चरस्य; D_7 विशोक; T_1 $G_{1.3}$ M_4 [अ]वलोकन्; T_2 [अ]वलोक्य; G_2 M_{1-3} [अ]वलोकान्; G_4 विलोकन् (for चरंश्चापि). B_2 Da त्यक्त्वा; B_4 damaged; G_3 तूर्णं (for ऊर्ध्वं). Da देहं; D_1 देह्यन् (sic). D_5 स्वर्गलोके (for देव°). — After 33, D_7 ins. 35*.

34 D_7 om. (hapl.) 34. — ^{a}) K_1 T_1 G $M_{1.3}$ संग्रामं; Da संग्रामो; M_2 संग्रामे. — ^{b}) M_2 प्रजां च. — ^{c}) Da_1 युक्ता. — ^{d}) Da S पश्चात्; D_4 युद्ध- (for युद्धे). K_5 क्षीणे; T_1 $G_{1.2.4}$ M क्षीणायुर्; G_3 क्षीणान्. — S (except T_2) ins. after 34 : D_7, after 33 :

35* यजन्ति यज्ञान्विजयन्ति राज्यं
रक्षन्ति राष्ट्राणि प्रियाणि चैषाम् ।

[(L. 1) M त्यजंति (for यजन्ति). $M_{1.3.4}$ राष्ट्राणि (for यज्ञान्वि-).]

35 D_8 T_2 om. (hapl.) 35. — ^{a}) Da बुद्धि-; D_7 धर्म-; T_1 G $M_{1.3.4}$ सर्व- (for प्राप्य). D_7 -शास्त्रान्. — ^{b}) K_5 Dn G_1 राज्यं (for राष्ट्रं). K_4 स्वराजा; D_7 T_1 G $M_{1.3.4}$ प्रजाश्च; M_2 प्रजां च. — ^{c}) D_7 S (T_2 om.) शास्त्रदृष्ट्या निवेश्य (D_7 विलोकान्; M_4 प्रवेश्य) (for स्थापयित्वा स्वधर्मे). — ^{d}) $Ś_1$ K_1 D_1 स्वर्गलोके.

36 ^{a}) D_5 वृत्ते; G_1 व्रतं (for वृत्तं). B_2 Da प्रशंसंति (for नमस्यन्ति). — ^{b}) K_2 स्वर्गस्थापि च; K_4 स्वर्गस्यापि च; Da स्वर्गस्थमपि. — ^{c}) D_4 G_1 °पदामात्र्याः. — ^{d}) D_7 T_1 G M_2 राजन् (for राजा). $Ś_1$ K_5 D_7 T_2 -सत्तम.

Colophon om. in $Ś_1$ $K_{1.2}$ D_1. — *Sub-parvan :* K_{3-5} V_1 B Da Dn D_{2-7} T_2 $G_{1.2}$ M राजधर्म. — *Adhy. name :* B_1 सेनजिद्गीता; Dn_1 सेनजिदुपाख्यानं; T_1 G सेनजिद्वाक्यं. — *Adhy. no.* (figures, words or both) : K_5 B_4 Da_1 Dn D_2 25; D_7 S 26 (as in text); D_8 24. — *Śloka no. :* Dn_1 36; D_8 35.

☞ After adhy. 26, N (except D_7) ins. a passage given in App. I (No. 4).

27

1 $D_{4.8}$ om. the ref. — ^{a}) K_4 बाल्ये. — Da_2 om. 1^b–2^d. — ^{d}) G_1 द्रौपदे. B_2 महामतौ.

13

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

C. 12. 800
B. 12. 27. 2
K. 12. 26. 2

तथान्येषु नरेन्द्रेषु नानादेश्येषु संयुगे ॥ २
न विमुञ्चति मां शोको ज्ञातिघातिनमातुरम् ।
राज्यकामुकमत्युग्रं स्ववंशोच्छेदकारकम् ॥ ३
यस्याङ्के क्रीडमानेन मया वै परिवर्तितम् ।
स मया राज्यलुब्धेन गाङ्गेयो विनिपातितः ॥ ४
यदा ह्येनं विघूर्णन्तमपश्यं पार्थसायकैः ।
कम्पमानं यथा वज्रैः प्रेक्षमाणं शिखण्डिनम् ॥ ५
जीर्णं सिंहमिव प्रांशुं नरसिंहं पितामहम् ।
कीर्यमाणं शरैस्तीक्ष्णैर्दृष्ट्वा मे व्यथितं मनः ॥ ६
प्राङ्मुखं सीदमानं च रथादपच्युतं शरैः ।
घूर्णमानं यथा शैलं तदा मे कश्मलोऽभवत् ॥ ७
यः स बाणधनुष्पाणिर्योधयामास भार्गवम् ।
बहून्यहानि कौरव्यः कुरुक्षेत्रे महामृधे ॥ ८
समेतं पार्थिवं क्षत्रं वाराणस्यां नदीसुतः ।
कन्यार्थमाह्वयद्वीरो रथेनैकेन संयुगे ॥ ९
येन चोग्रायुधो राजा चक्रवर्ती दुरासदः ।
दग्धः शस्त्रप्रतापेन स मया युधि घातितः ॥ १०
स्वयं मृत्युं रक्षमाणः पाञ्चाल्यं यः शिखण्डिनम् ।

---

2 Da_2 om. 2 (cf. v. l. 1). —[a]) B_1 वसुसेने; Dn_1 वृषसेने; Cnp as in text. M_2 धर्मज्ञ. —[b]) K_5 वृषकेतौ; D_4 दृष्ट°. K_3 पातितौ; K_5 D_4 पातिते; B_2 D_7 S चेदिपे; Da_1 वेदिते; $D_{6.8}$ पार्थिव. —[d]) Da_1 $D_{4.8}$ G_4 -देशेषु.

3 Bo om. (hapl.) 3–9. —[a]) K_2 Dn D_7 च मुंचति; B_2 Da मुंचति च (for विमुञ्चति). D_4 शोको मां (by transp.). G_2 न विमुंचन्निमाल्लँलोकान्. —[b]) D_2 om. घातिन; Da_2 -यातिनम्. —[c]) V_1 राज्यघातिनम्. —[d]) B_5 स्ववंशच्छेद-; D_7 S स्ववंशोत्साद-. K_2 $B_{1.3-5}$ Dn -कारिणं; $D_{6.7}$ -कारणं (for -कारकम्).

4 Bo om. 4 (cf. v. l. 3). —[a]) D_4 यस्यांकि (sic); D_8 यस्यांगे. D_7 क्रीडमाने च; D_8 °यानेन (for °मानेन). —[b]) Da D_7 T $G_{3.4}$ M Cv वि-; G_1 [अ]पि; G_2 च (for वै). B_2 Da_1 परिसर्पितं; Da_2 °सर्पितः; D_6 °कीर्तितं; T_2 °वर्धितं; G_3 °वर्तनं (for °वर्तितम्). —[d]) $K_{2.3.5}$ V_1 B_{1-5} Da Dn $D_{2-6.8}$ S युधि पातितः.

5 Bo om. 5 (cf. v. l. 3). —[a]) K_3 D_4 चैनं. D_1 विघर्णांतम् (sic). —[b]) D_7 S मदर्थं (for अपश्यं). $B_{1.2}$ -शायकैः. —[c]) K_3 $B_{3.4}$ Da कंप्यमानं; D_7 S तक्ष्यमाणं (G_1 तार्क्ष्यं°). D_7 M_3 यथावज्रैः. —[d]) K_1 प्रक्षमाणं; K_{2-5} B (Bo om.) Dn $D_{3.5-8}$ G M_{1-3} प्रेक्ष्य°; Da प्रेर्यं°. $K_{4.5}$ Dn $D_{2.3.5.6.8}$ शिखंडिना; B_2 °ढिणं; B_4 °डिनः; D_4 शिषंडिनं.

6 Bo om. 6 (cf. v. l. 3). —[a]) $K_{2.3}$ $B_{2.3.5}$ Dn_2 D_{2-8} जीर्ण-. K_4 D_4 प्रांशु-; V_1 $B_{1.3-5}$ $D_{2.3.5.8}$ [अ]रण्ये; B_2 Da प्राप्तं; D_7 S प्राज्ञं (for प्रांशुं). —[b]) D_6 नरसिंह-. —[c]) B_1 D_4 कार्यमाणं; D_7 यतमान. $K_{2.3.5}$ V_1 B (Bo om.) D (except D_1) S दीप्तैर् (for तीक्ष्णैर्). —[d]) V_1 भृशं (for दृष्ट्वा).

7 Bo om. 7 (cf. v. l. 3). —[a]) $D_{2.3.8}$ M_2 प्राङ्मुखे; Da_1 प्राङ्मुखी. M_2 सीदमानश्च. —[b]) $K_{1.4}$ अप्रच्युतं; D_1 अपहृतं (for अपच्युतं). K_5 V_1 B (Bo om.) Da Dn $D_{2.3.5-8}$ S Cv रथे (T G Cv °थात्) प-(K_5 पा)ररथारुजं; D_4 कश्मलंरपररथारुजो (sic). —[d]) T_1 $G_{1.3.4}$ तथा (for तदा). K_1 कल्मशो. K_3 Da_1 G_1 भवेत् (for ऽभवत्).

8 Bo om. 8 (cf. v. l. 3). —[a]) D_4 यस्य; D_7 यश्च (for यः स). Da चाप- (for बाण-). —[c]) K_4 ब्रह्माणि (for बहूनि). Da $D_{3.5}$ कौरव्य; $M_{1.3}$ कौरव्यं. —[d]) D_4 -क्षेत्र-. K_3 D_4 -मृधि.

9 Bo om. 9 (cf. v. l. 3). —[a]) Dn_2 समेतां. G_1 पार्थिवः. V_1 $B_{1.3.4}$ Da_1 क्षेत्रं. —[b]) T_2 G_2 $M_{2.4}$ वारणस्यां. $B_{1.4}$ तु दीक्षितं (B_4 °तः); B_3 (m as in text) न दीक्षितं; D_4 नदासुतीः (sic); G_3 नदीसुतं. —[c]) B_3 कस्यार्थम्; Da_2 कृत्यार्थन् (sic). K_1 आहुयंद्; D_7 आगतान् (for आह्वयद्). $G_{1.2}$ धीरो. —[d]) Da रणेन (for रथेन). B_2 पार्थिवान् (for संयुगे).

10 [b]) D_1 चक्रे वर्ती. Da_1 सुरासदः; T_2 निपातितः. —[c]) K_4 दग्धा; D_8 दग्ध-; T_2 दंड- (for दग्धः). K_2 Dn_1 चास्त्र-; Dn_2 चात्र; D_2 शास्त्र- (for शस्त्र-). —[d]) B (B_4 damaged) Da Dn_1 $D_{2.3.5.7.8}$ T G_{2-4} $M_{1.3.4}$ पातितः (for घा°).

11 [a]) $K_{2.3}$ Da $D_{2.6}$ T_2 $G_{1.2}$ $M_{2.4}$ रक्ष्य(Da वक्ष्य)माणः (T_2 G_1 °णं). —[b]) Da_1 $D_{1.3.8}$ पंचाल्यं. B_2 तु; Da च (for यः). D_1 शिखंडितं. —[c]) T_1 G_2 स (for न). $D_{3.5.8}$ शातया°. —[d]) Da निवारितः.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न बाणैः पातयामास सोऽर्जुनेन निपातितः ॥ ११

यदैनं पतितं भूमावपश्यं रुधिरोक्षितम् ।
तदैवाविशदत्युग्रो ज्वरो मे मुनिसत्तम ॥ १२

येन संवर्धिता बाला येन स्म परिरक्षिताः ।
स मया राज्यलुब्धेन पापेन गुरुघातिना ।
अल्पकालस्य राज्यस्य कृते मूढेन घातितः ॥ १३

आचार्यश्च महेष्वासः सर्वपार्थिवपूजितः ।
अभिगम्य रणे मिथ्या पापेनोक्तः सुतं प्रति ॥ १४

तन्मे दहति गात्राणि यन्मां गुरुरभाषत ।
सत्यवाक्यो हि राजंस्त्वं यदि जीवति मे सुतः ।
सत्यं मा *मर्शयन्विप्रो मयि तत्परिपृष्टवान् ॥ १५

कुञ्जरं चान्तरं कृत्वा मिथ्योपचरितं मया ।
सुभृशं राज्यलुब्धेन पापेन गुरुघातिना ॥ १६

सत्यकञ्चुकमास्थाय मयोक्तो गुरुराहवे ।
अश्वत्थामा हत इति कुञ्जरे विनिपातिते ।
कान्तु लोकान्गमिष्यामि कृत्वा तत्कर्म दारुणम् ॥ १७

अघातयं च यत्कर्णं समरेष्वपलायिनम् ।
ज्येष्ठं भ्रातरमत्युग्रं को मत्तः पापकृत्तमः ॥ १८

अभिमन्युं च यद्बालं जातं सिंहमिवाद्रिषु ।
प्रावेशयमहं लुब्धो वाहिनीं द्रोणपालिताम् ॥ १९

तदाप्रभृति बीभत्सुं न शक्नोमि निरीक्षितुम् ।
कृष्णं च पुण्डरीकाक्षं किल्बिषी भ्रूणहा यथा ॥ २० C. 12. 820 B. 12. 27. 22 K. 12. 25. 21

---

12 a) B1 T1 G1. 3 यद्देनं; B4 Da1 यदिनं. D2. 3 पातितं. — b) D1 अवध्यं. D6 रुधिरोक्षतं; G2 °क्षितः. — c) K3 D4. 7 T1 तदेव. Da1 [आ]विशम्. D7 अत्यग्रो. Da2 corrupt. — d) B2 शोको; D1 जारो (for ज्वरो). K3. 5 V1 B Da Dn D2. 4. 6–8 S मां (G2 M1. 3. 4 मा; M2 वा) (for मे). B2 Da इह (for मुनि-). Da D4 -सत्तमः.

13 a) D1 संविधिता; D4 संवद्धिना. — b) B2 Da D7 T2 G1 सं- (for स्म). Dn1 D6 परिपालिताः. — c) D1 राज्यल°; D4 राजलु°. — e) D8 अल्पकालेन. — f) K5 मुग्धेन (for मूढेन). K3 D2. 3. 5. 7. 8 S पातितः. D4 मया मुग्धे निपातितः.

14 a) B2 Dn2 आचार्यः स; Da1 आचार्यस्य; D8 अत्राश्चर्य-. — c) D4 अधिगम्य. — d) Da जयं (for सुतं).

15 b) K3 V1 D4 मे; G1. 3 M मा (for मां). K1 अभाषित. — c) K3. 5 V1 B Da Dn2 D2–8 S सत्य(Da सृज्य)माख्याहि (D6 °य; M3 °ति); Dn1 सत्यं वदस्व. B2 Da राजेंद्र; B5 मे राजंस्त्वं (hypermetric); Dn2 जीवंस्त्वं. — d) Da1 सुतं. — e) Ś1 K1–4 V1 Bo. 1. 3–5 Dn1 D2. 3. 5. 7. 8 T2 G2–4 M2 सत्यमामर्षयन् (K1 °यं); K5 सत्यं मां मर्षयन्; Dn2 T1 G1 M1. 3. 4 सत्यं मा मर्षयन्; D1 सत्यमामर्षयद्; D6 सत्यमावर्षयन् (for सत्यं मा *मर्शयन्). B2 नान्यस्या ✻✻✻ द्विप्रो; Da1 न्याय[नान्य]स्याश्रद्दधद्विप्रो; Da2 तान्यस्याश्रदधिप्रो (corrupt). — f) D3. 5 मय्येतत्; D4 मयि यत्. B1 -सृष्ट वान्; D4 -वष्टवान्; T G -दृष्टवान् (for -पृष्ट°).

16 a) Da कुंजरं चातुरं; D7 आत्मानं चांतरं; M2 कुंजरस्यांतरं. Ca cites अन्तरं (as in text). D1 हत्वा. — b) V1 B Da D4. 6 G M1. 3. 4 -चरितो. — 16^{cd} = (var.) 13^{cd}. — c) K4 D1. 4 स भृशं.

17 D4 om. up to लोकान् (in e). — a) D5 सत्त्वकंचुकम्; D7 सत्यं कवचम्. V1 Bo. 1. 3–5 Da उत्सृज्य; B2 Dn D2. 3. 5. 6. 8 उन्मुच्य; D7 S आमुच्य (for आस्थाय). — b) Ś1 K1. 2. 4 D1 निहतो; K3. 5 B2 Da D2. 3. 5. 8 स मया; V1 Bo. 1. 3–5 Dn D6 मया स (Dn2 सु-). G1 गुरुणाहवे. — d) K3 Da D7 M निहते कुंजरे मुने (K3 हते); K5 कुंजरे मुने हते (sic); V1 B Dn D2. 3. 5. 6. 8 मयोक्तः कुंजरे हते; T G कुंजरे निहते मुने. — e) K3. 5 D3. 5. 8 कं नु लोकं; Dn काल्ँलोकान्नु; D2 कान्नु लोकं; D7 काल्ँलोकान् (submetric); T1 G2–4 कान्वा लोकान्; G1 कांश्च लोकान्. — f) V1 D6 M4 कर्म सुदारुणं; Bo. 1. 3–5 Dn D2. 3. 5. 8 कर्म सुदुष्करं (for तत्कर्म दारुणम्).

18 K3 om. up to पाप (in d). — b) Da T1 अपातयञ्च. Da2 यत्कर्णौ; G3 तत्कर्णं. — c) K2. 5 Da Dn2 D4. 6 G1 M4 ज्येष्ठ-. K1 अत्युग्रे; D7 T G अत्युग्रः. — d) D4 पापकोत्तमः.

19 a) Da मद्बालं. — b) D1 सिंहं जातम् (by transp.). V1 सिंह (for सिंहम्). — c) D8 प्रावेशहं; M2 प्रवेशयम्. D8 यत्र; G4 अयं (for अहं). M1. 2 युद्धे (for लुब्धो). — d) K2 वाहिणीं.

20 a) D7 बीभत्सुर्. — b) D7 शक्नोति. V1 D1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 820 B. 12. 27. 22 K. 12. 26. 22 द्रौपदीं चाप्यदुःखार्हां पञ्चपुत्रविनाकृताम् ।
शोचामि पृथिवीं हीनां पञ्चभिः पर्वतैरिव ॥ २१
सोऽहमागस्करः पापः पृथिवीनाशकारकः ।
आसीन एवमेवेदं शोषयिष्ये कलेवरम् ॥ २२
प्रायोपविष्टं जानीध्वमद्य मां गुरुघातिनम् ।
जातिष्वन्यास्वपि यथा न भवेयं कुलान्तकृत् ॥ २३
न भोक्ष्ये न च पानीयमुपयोक्ष्ये कथंचन ।
शोषयिष्ये प्रियान्प्राणानिहस्थोऽहं तपोधन ॥ २४
यथेष्टं गम्यतां काममनुजाने प्रसाद्य वः ।
सर्वे मामनुजानीत त्यक्ष्यामीदं कलेवरम् ॥ २५

वैशंपायन उवाच ।
तमेवंवादिनं पार्थं बन्धुशोकेन विह्वलम् ।
मैवमित्यब्रवीद्व्यासो निगृह्य मुनिसत्तमः ॥ २६
अतिवेलं महाराज न शोकं कर्तुमर्हसि ।
पुनरुक्तं प्रवक्ष्यामि दिष्टमेतदिति प्रभो ॥ २७
संयोगा विप्रयोगाश्च जातानां प्राणिनां ध्रुवम् ।
बुद्बुदा इव तोयेषु भवन्ति न भवन्ति च ॥ २८
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥ २९
सुखं दुःखान्तमालस्यं दाक्ष्यं दुःखं सुखोदयम् ।

T G3. 4 M1. 3 [अ]भिवी° (for निरी°). — d) D2. 3. 5. 8 ब्रह्महा यथा; T2 भ्रूणहा इव; M2 भ्रूणहत्यया.

21 a) D1 वा (for च). K1. 2. 4. 5 V1 B Da Dn D2. 3. 5. 6. 8 चापि (K2. 4 प्राप्य; D6 चाति-) दुःखार्तां. — b) V1 B1. 2 Da Dn D6 °पुत्रैर् (for °पुत्र-). — c) G2 पतिभिर् (for पृथिवीं). — d) D6 पंचमैः (for °भिः).

22 c) K1 आमीष (for आसीन). G2 अत एव ममै-वेदं. — d) D3. 7 T1 G3. 4 M1. 3. 4 कळेबरं.

23 a) D7 T2 G1. 3. 4 M जानीष्व. — b) K3 Dn1 अथ मां; Da2 corrupt; D7 S मामद्य (G2 ममाद्य). Dn2 कुरु-. Da -घातिनां. — B1 om. 23^c–24^b. — c) Da च (for [अ]पि). K2 तथा (for यथा). B2 D7 T1 G M यथान्यास्वपि जातीषु; T2 यथान्यासं विजानीष्व. — After 23, K5 ins.:

36* नोपभोक्ष्ये वरान्भोगान्न राज्यं तत्परिच्छदान् ।

24 B1 om. 24^{ab} (cf. v. l. 23). — a) M1 न च (for the first न). K2. 4 भोज्यं; K5 चान्नं; Da1 भोक्षे (भोक्ष्ये). — b) K1 उपयोक्षे; K5 Dn D6–8 उपभोक्ष्ये; B2 अपयोक्ष्ये; D4 उपयोक्ष्य. D1–3. 5. 8 कदाचन. — c) D1 मोचयिष्ये; G1 तोषयिष्ये. Da D6 प्राणा; G1 पुत्रान्. — d) Da गृहस्थोहं; Dn2 D6 निहतोहं. K3 B1–5 Dn2 D6 तपोधनाः; K4 Bo Da °धनः; D4. 7 °धनं.

25 a) K4 G4 कर्म (for कामम्). — b) D7 अनु-कामे. K4. 5 Da D7 M1. 3 च (for वः). — c) K1 B1 D1 सर्वेषाम्. B2 Da अनुजानीध्वं. — d) B1 परि-त्यक्ष्ये; Da परित्यक्ते; D1 तक्ष्यामीदं. D3. 7 T1 G3. 4 M1. 3. 4 कळेबरं. — After 25, V1 (marg.) Da1 read the colophon, repeating it in its proper place.

26 Ś1 K1–3. 5 D1. 4. 5. 7. 8 T G M2. 4 om. the ref. — a) Da D1 तमेव (तमेवं-). — b) B2 विधुरं; D4 पीडितं (for विह्वलम्). — c) D1. 7 नैवम्. — d) K5 D4 मुनिसत्तम. — After 26, Ś1 K1. 2. 4 D1 read the colophon, repeating it in its proper place.

27 Before 27, Ś1 K V1 B Da Dn D1–6 M1–3 ins. व्यास उवाच (K2. 4 श्रीवेदव्यासः). — a) D8 अतिबलं; Ca as in text. T1 महाभाग; G1 °राजन्. — c) K1 पुरुरुक्तं (sic). K2. 3. 5 Bo. 1. 3–5 Dn तु; B2 Da D2. 3. 5–8 S च (for प्र-). — d) B1 पुरातने (for इति प्रभो).

28 B1 D6 om. (hapl.) 28^a–29^b. — a) K4 संयोग-; Da2 संयोगाद्; D1 corrupt. Ś1 K1. 2. 4 V1 Bo. 2–5 Da Dn D1–3. 5. 8 विप्रयोगांता. D4. 7 T G M1. 3. 4 संयोगाश्च वियोगाश्च (D4 om. वियोगाश्च). — b) M1. 3 जातीनां. V1 Bo. 2. 4. 5 Dn2 D2–5. 7 T1 G4 ध्रुवाः; B3 D8 G1 M ध्रुवः; G3 ध्रुवा. — c) Da लोकेषु (for तोयेषु).

29 = (var.) 11. 2. 3: B. 12. 330. 20: B. 14. 44. 19; Rām. 2. 105. 16; 7. 52. 11; Gobhilasmṛti 3. 43; Kathāsaritsāgara 51. 26^{cb}–27^{ab}; Divyāvadāna (Cowell) p. 27. B1 D6 om. 29^{ab} (cf. v. l. 28). — a) K1 निचयः. — b) D8 एतेनांताः. — c) K4 संयोग-. D2. 3. 8 °गाश्च वियोगांता. — d) V1 Bo. 1. 5 D7 S च (for हि).

30 = (var. B. 12. 174. 38. — a) D8 दुःखं;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतिः श्रीर्ह्रीर्धृतिः सिद्धिर्नादक्षे निवसन्त्युत ॥ ३०
नालं सुखाय सुहृदो नालं दुःखाय दुर्हृदः ।
न च प्रज्ञालमर्थेभ्यो न सुखेभ्योऽप्यलं धनम् ॥ ३१
यथा सृष्टोऽसि कौन्तेय धात्रा कर्मसु तत्कुरु ।
अत एव हि सिद्धिस्ते नेशस्त्वमात्मना नृप ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥

२८

वैशंपायन उवाच ।
ज्ञातिशोकाभितप्तस्य प्राणानभ्युत्सिसृक्षतः ।
ज्येष्ठस्य पाण्डुपुत्रस्य व्यासः शोकमपानुदत् ॥ १
व्यास उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अश्मगीतं नरव्याघ्र तन्निबोध युधिष्ठिर ॥ २
अश्मानं ब्राह्मणं प्राज्ञं वैदेहो जनको नृपः ।
संशयं परिपप्रच्छ दुःखशोकपरिप्लुतः ॥ ३
जनक उवाच ।
आगमे यदि वापाये ज्ञातीनां द्रविणस्य च ।
नरेण प्रतिपत्तव्यं कल्याणं कथमिच्छता ॥ ४
अश्मोवाच ।
उत्पन्नमिममात्मानं नरस्यानन्तरं ततः ।
तानि तान्यभिवर्तन्ते दुःखानि च सुखानि च ॥ ५ C 12. 837 B. 12. 28. 5 K. 12. 27. 5

G1 M1 सुख (for सुखं). Dn आलक्ष्यं; D2. 3 आलक्ष्य; D7 आलस्य-; Ca as in text. —[b]) Dn2 दीक्ष्यं दुःखं; D2. 3 वीक्ष्य दुःखं; D4 दुःखं दाख्यां; D5 (om. दाक्ष्यं) दुःखं; D7 S दुःखं दाक्ष्यं (by transp.). Ca cites दाक्ष्यं (as in text). —[c]) D7 T G M1. 3. 4 विभूतिः श्रीर् (for भूतिः श्रीर्ह्रीर्). Ca cites भूतिः (as in text). K1. 2. 4 श्रीश्च; Da1 M2 श्रीर्धीर्; Da2 श्री धीर्; D2. 3. 5. 8 ह्रीः श्रीर्; D4 श्रीघा (for श्रीर्ह्रीर्). K1 वृत्तिः सिद्धिं; K3 Bo. 1. 3–5 Dn D1–3. 5. 6. 8 धृतिः कीर्तिर्; Da1 धृतिसिद्धान्. —[d]) Ś1 K1 नादक्षो; D1 नादे (sic). K3. 5 Dn D2. 3. 5. 6. 8 दक्षे (D3 °क्ष्ये) वसति नालसे.

31 = (var.) B. 12. 174. 29. —[b]) B2 Da Dn D2. 3. 5–8 T G2–4 M शत्रवः; G1 शात्रवाः (for दुर्हृदः). —[c]) D6. 7 प्रज्ञानम्; Bom. ed. प्रजालम् (for प्रज्ञालम्). अर्थिभ्यो; D7 T G1. 2. 4 M अर्थानां. G3 न च प्रज्ञा अनर्थानां. —[d]) D3. 5. 7. 8 S सुखानामलं.

32 [b]) B1 धर्मं (for धात्रा). D2. 3. 5. 8 कर्म स तत्; D7 S कर्म तथा. —[c]) D7 एवं. Da1 सिध्यंते; Da2 सिद्धिं ते. —[d]) K2–5 V1 B2. 3 Da Dn D1–6. 8 कर्मणां; Bo. 1. 4 Da कर्मणो; B5 कर्मणी; D7 S ह्यात्मनो. K1 नैशस्वेनात्मना नृप (sic).

Colophon. — Ś1 K1. 2. 4 D1 (erroneously) read this colophon after st. 26, and V1 Da1 after 25, all repeating it in the proper place. — *Sub-parvan :* Ś1 K V1 B (B4 damaged) Da Dn D1–7 T2 G1. 2 M राजधर्म. — *Adhy. name :* B1 युधिष्ठिरशांत्वना; Dn1 युधिष्ठिरविलापः; Dn2 व्यासवाक्यं; T1 G1. 4 युधिष्ठिर-शोकापनोदनं; M2 युधिष्ठिरप्रायोपवेशनिवर्तनं. — *Adhy. no.* (figures, words or both): B1 Da1 Dn D2. 7 S 27 (as in text); D8 26. — *Śloka no.:* Dn1 24.

28

1 D8 om. the ref. —[b]) Ś1 (before corr.) Ca अत्युत्-; D4 अप्युत्- (for अभ्युत्-). B1 -सिसिक्षतः. Da D7 S प्राणानिष्टांस् (Da भ्रातृनिष्टांस्; T2 प्राणनिष्टां) त्यजिष्यतः. —[c]) T2 राज- (for पाण्डु-). —[d]) K4 Da उपानुदत्; D3 अवानु°.

2 D8 om. the ref. —[c]) D7 अजनीत (for अश्म-गीतं). —[d]) K1 मन् (for तन्).

3 [a]) D4 अत्मश्मानं (sic). Da प्राप्तं; D1 प्राज्ञ. —[b]) K1 D1 वैदेहं. B1 Da1 Dn D7 T1 G2–4 नृप (for नृपः). —[c]) Da समयं (for संशयं). —[d]) K3. 5 V1 B D (except D1) S -समन्वितः (for -परिप्लुतः).

4 Da D8 om. the ref. —[a]) K4 आगमो यदि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C.12.838 B.12.28.6 K.12.27.6 तेषामन्यतरापत्तौ यद्यदेवोपसेवते ।
तत्तद्धि चेतनामस्य हरत्यभ्रमिवानिलः ॥ ६
अभिजातोऽसि सिद्धोऽसि नासि केवलमानुषः ।
इत्येवं हेतुभिस्तस्य त्रिभिश्चित्तं प्रसिच्यति ॥ ७
स प्रसिक्तमना भोगान्विसृज्य पितृसंचितान् ।
परिक्षीणः परस्वानामादानं साधु मन्यते ॥ ८
तमतिक्रान्तमर्यादमाददानमसांप्रतम् ।
प्रतिषेधन्ति राजानो लुब्धा मृगमिवेषुभिः ॥ ९

ये च विंशतिवर्षा वा त्रिंशद्वर्षाश्च मानवाः ।
परेण ते वर्षशतान्न भविष्यन्ति पार्थिव ॥ १०
तेषां परमदुःखानां बुद्ध्या भेषजमादिशेत् ।
सर्वप्राणभृतां वृत्तं प्रेक्षमाणस्ततस्ततः ॥ ११
मानसानां पुनर्योनिर्दुःखानां चित्तविभ्रमः ।
अनिष्टोपनिपातो वा तृतीयं नोपपद्यते ॥ १२
एवमेतानि दुःखानि तानि तानीह मानवम् ।
विविधान्युपवर्तन्ते तथा सांस्पर्शकानि च ॥ १३

वापायो. —^{b}) V_1 Da Dn_2 $D_{6.7}$ S (except G_4) वा; B_1 ह (for च). —^{c}) Bo परि- (for प्रति-). —^{d}) D_7 इच्छत; M_1 इच्छतां. D_1 कथं कल्या*मिच्छतां.

5 = (var.) B. 12 176. 4. D_8 om. the ref. $K_{2.4}$ अश्मकः; G_1 अश्मानः; M_4 अश्मः (for अश्मा). —^{a}) $Ś_1$ $K_{1.4}$ इदम्; $Bo._1$ एवम् (for इमम्). —^{b}) D_7 अन्वास्य (for नरस्य). —^{c}) B_5 Da [अ]तिवर्तते; Dn_1 [अ]नु°. — B_1 om. 5^d–7^a.

6 B_1 om. 6 (cf. v. l. 5). —^{a}) D_4 °तरायत्तो; T_1 G_{2-4} °तरोऽपत्तौ; T_2 °तमापत्तौ. —^{b}) K_2 V_1 $Bo._{2-5}$ Da Dn $D_{2.3.5.6.8}$ [उ]पपद्यते; K_8 °मेरते; D_1 °मेवते (for °सेवते). —^{c}) $K_{2.3.5}$ V_1 Da Dn $D_{2.6}$ तदस्य; $Bo._{2-5}$ $D_{3-5.8}$ तदत्र; D_7 T G M_2 तत्तत्र; $M_{1.3.4}$ तत्तस्य (for तत्तद्धि). $K_{2.3.5}$ V_1 Da Dn D_6 आशु (for अस्य). —^{d}) D_7 M_4 [अ]नलः.

7 = (var.) B. 12. 176. 17^{cd}–18^{ab}. B_1 om. 7^a (cf. v. l. 5). —^{a}) V_1 °जातोसि. Da शूरो (for सिद्धो). Ca cites सिद्धः. —^{b}) G_1 नास्त्यकेवल°; M_1 नास्ति केवल°. —^{c}) $K_{2.3.5}$ V_1 B Dn D_{2-8} S इत्येभिर्; Da इत्येतैर् (for इत्येवं). D_4 स्वस्य; D_7 तत्र (for तस्य). —^{d}) G_3 चित्रं. $Ś_1$ (by corr.) K_4 D_1 प्रसिध्यति; $K_{1-3.5}$ $Bo._{2-5}$ Dn $D_{2-6.8}$ T_1 $G_{1.2.4}$ M प्रसिच्यते; V_1 प्रसाद्यते; B_1 T_2 Cap प्रसज्यते; Da_1 प्रसादति; Da_2 प्रमाद्यति; D_7 G_3 प्रसिध्यते; text as in $Ś_1$ (before corr.) Ca only.

8 = (var.) B. 12. 176. 18^{cdef}. —^{a}) K_2 योप्रसिक्त-; K_8 V_1 $B_{1.3}$ (marg.) Da Dn $D_{2.6}$ $G_{1.2.4}$ M_2 Ca संप्रसक्त-; K_4 योप्रसक्त-; K_5 $Bo._{2-5}$ $D_{3-5.8}$ T_1 G_3 $M_{1.3.4}$ Cv संप्रासिक्त-; D_1 T_2 स प्रसक्त-; D_7 स प्रसिद्ध-; text as in $Ś_1$ K_1 only. D_1 भोगाद्; Ca.v as in text. —^{b}) $Bo._3$ विसृजन्; D_4 विसृष्ट-; Ca त्रिसृज्य (as in text). K_1 पितृमश्चित्तान् (sic); V_1 B_3 मृत्युसंमितान्; $B_{2.4}$ पितृसंचयान्; Dn_2 परिसंचितान्. —^{c}) V_1 परक्षीणः; G_1 परीक्षिणः; Ca as in text. V_1 परिस्वानां. — D_8 om. (hapl.) 8^d–9^a. —^{d}) B_2 Da अभि-; D_7 S बहु (for साधु).

9 = (var.) B. 12. 176. 19. D_8 om. 9^a (cf. v. l. 8). Da_1 om. 9^{cd}. —^{d}) = 3. 198. 26^d. D_1 लब्धा; Ca लुब्धा (as in text).

10 D_7 T G transp. 10 and 11. —^{a}) D_1 नर्व (for च). V_1 B Da Dn_2 $D_{2.3.5.7.8}$ S (except G_1) वै (for वा). —^{b}) D_1 °द्वर्षाश्च मानुषाः. —^{c}) Da सर्वे न; Cv परेण (as in text). B_2 Da Cv वर्षशता; G_3 °शतं. —^{d}) B_2 Da भविष्यंतीह; T_1 G न जीविष्यंति. Da_2 G_4 पार्थिवः; D_4 $G_{2.3}$ °वाः.

11 11^{ab} = (var.) B. 12. 176. 21^{ab}. D_7 T G transp. 10 and 11. D_8 reads 11 twice. —^{b}) $K_{2.3.5}$ V_1 B Da Dn $D_{2-7.8}$ (both times) S भैषज्यमाचरेत्. Ca cites भेषजम् (as in text). —^{c}) $D_{3.6.8}$ (first time) सर्वं (for सर्व-). Da_1 -भृतं; D_2 -धृतां (for -भृतां). D_8 (first time) वरं; T_2 $G_{1.3}$ वित्तं (for वृत्तं). —^{d}) $Ś_1$ K_4 D_1 प्रेक्षणीयम्; K_1 G_2 °माणम्; K_2 °माणंस्; Da_2 °माणास्; Dn_1 प्रेक्ष्यमाणस्. $Ś_1$ $K_{1.4}$ D_1 G_2 इतस्ततः; M_4 समंततः. D_8 (first time) प्रेक्ष्यमाणभाविष्यति (sic).

12 ^{a}) D_1 मानुसानां; D_6 मानुषानां. V_1 (orig.) याति; V_1m योनिं (for °निर्). —^{b}) V_1 चैव विभ्रमं. —^{c}) K_2 °ष्टोपरितापो; K_4 °ष्टोपरिपातो; D_7 °ष्टोपनिपाते. —^{d}) M_4 तृतीयो. B_2 D_7 T $G_{1.3.4}$ $M_{1.3}$ नोपलभ्यते.

13 = (var.) B. 12. 176. 20. —^{b}) B_5 तानीव. D_7 मानसे. —^{c}) K_2 -सेवंत; K_4 -सेवंते; Da_1 -सर्पंत;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जरामृत्यू ह भूतानि खादितारौ वृकाविव ।
बलिनां दुर्बलानां च ह्रस्वानां महतामपि ॥ १४
न कश्चिज्जात्वतिक्रामेज्जरामृत्यू ह मानवः ।
अपि सागरपर्यन्तां विजित्येमां वसुंधराम् ॥ १५
सुखं वा यदि वा दुःखं भूतानां पर्युपस्थितम् ।
प्राप्तव्यमवशैः सर्वं परिहारो न विद्यते ॥ १६
पूर्वे वयसि मध्ये वाप्युत्तमे वा नराधिप ।
अवर्जनीयास्तेऽर्था वै काङ्क्षिताश्च ततोऽन्यथा ॥ १७
सुप्रियैर्विप्रयोगश्च संप्रयोगस्तथाप्रियैः ।
अर्थानर्थौ सुखं दुःखं विधानमनुवर्तते ॥ १८
प्रादुर्भावश्च भूतानां देहन्यासस्तथैव च ।
प्राप्तिर्व्यायामयोगश्च सर्वमेतत्प्रतिष्ठितम् ॥ १९
गन्धवर्णरसस्पर्शा निवर्तन्ते स्वभावतः ।
तथैव सुखदुःखानि विधानमनुवर्तते ॥ २०
आसनं शयनं यानमुत्थानं पानभोजनम् ।
नियतं सर्वभूतानां कालेनैव भवन्त्युत ॥ २१
वैद्याश्चाप्यातुराः सन्ति बलवन्तः सुदुर्बलाः ।
स्त्रीमन्तश्च तथा षण्ढा विचित्रः कालपर्ययः ॥ २२

C. 12. 854
B. 12. 28. 22
K. 12. 27. 22

Da2 -सर्प्यंत. D7 विषयानपवर्ततें. — [d]) Da यथा (for तथा). K2. 3. 5 V1 Bo. 5 Dn1 D4 G2 M (M4 *inf. lin.*) संस्पर्शजान्यपि; B1-4 Da D2. 3. 5 संस्पर्शजान्युत; Dn2 संसर्गजान्यपि; D1 सांख्यर्शिकानि च (sic); D6 संस्पृशजान्यपि; D8 संस्पर्शितान्यपि; T G3. 4 संस्पर्शकान्यपि; G1 संकल्पकान्यपि; M4 संकल्पजान्यपि.

14 [a]) K1 -सृत्युर्; B1. 2 Da2 -मृत्यु. K1-3. 5 V1 B D S हि (for ह). K3. 5 B D (except D1) S (G1 by corr.) भूतानां. G1 (before corr.) जरामृत्यभिभूतानां. — [b]) K1 D4 खादितारो. K1 वृकाविह; D5 वृकानि(*sup. lin.* °का इ)व. — T1 om. 14[c]-16[b].

15 T1 om. 15 (cf. v. l. 14). — [a]) M1. 3 स (for न). Da1 कचिज्. D7 जात्यातिक्रामो; M1 जल्पतिक्रामेज्. — [b]) K1 D2 -सृत्युर्; D1 सृत्यु. All MSS. (except Ś1; T1 om.) हि. Da2 D7 मानवाः; G3 मानवं. — B1 om. 15[cd]. — [c]) D7 अधि- (for अपि). Da1 D7 G1 -पर्यंतं. — [d]) D6 विजित्य वसुधामिमां.

16 G2 om. 16. T1 om. 16[ab] (cf. v. l. 14). — [b]) K1 Bo. 1. 3. 4 Dn2 D6 पर्यवस्थितं; D1 पर्युपासितं; G1. 3. 4 प्रत्युपस्थितं (G1 °तां). V1 दैवतेषु यदुपस्थितं (hypermetric). — [c]) Dn2 अवशं; D7 S (G2 om.) एव तैः (for अवशैः). — [d]) V1 परीहारो; D7 परिहासे (for परिहारो).

17 [b]) K2-5 V1 B Da Dn D1-6. 8 [अ]प्युत्तरे वा; D7 M4 [अ]प्यंत्यमे वा; T1 ह्यंतिमे वा; T2 [अ]प्यंते वापि; G1-3 अंतिमे वा; G4 अंत्यमे वा; M1. 3 उत्तमे वा (with hiatus). Da D7 S जनाधिप. — [c]) Da ह्यर्था वै; D1 तेर्थाश्च; D7 M3 तीर्था वै; M1 तीर्थौ वै. — [d]) K1 Dn1 कांक्षितापि; K2. 3 V1 B D2. 3. 5. 6. 8 °ता ये; K5 Da1 Dn2 कांक्षतापि; D4 कांक्षितापि; D7 T G कांक्षि(T2 °क्ष)ता वै; M कांक्षता (M1 °तो) वा. Da2 कांक्षता पितरोन्यथा.

18 [a]) K4 विप्रयोगाश्च; D1 विप्रियो यैश्च. K2. 3 B Da D2. 3. 5. 8 अप्रियैः (Da1 °यं) सह संयोगो. — [b]) D1 सप्रयोगस्; G1 सुप्रयोगश्. K5 च सुप्रियैः; V1 Dn D4. 6. 7 S (except T2) च विप्रियैः. K2. 3 B Da D2. 3. 5. 8 विप्रयोगश्च सु(B1. 4 सं)प्रियैः. — [c]) K5 D4 अर्थोनर्थः; B2 अर्थानर्थं; Da °दर्थं. G1 सुदुःखं वा.

19 Ś1 K1. 2 T2 M2 om. (hapl.) 19-20; K4 om. 19. — [a]) D1 प्रादुर्भुवश्च. — [b]) K3. 5 V1 Dn D4 -त्यागस्; Bo -न्यासं (for -न्यासस्). Da हि (for च). — [c]) K3. 5 B1. 3. 5 Dn D1. 2. 4. 6. 7 प्राप्तिर्; V1 प्राप्ति-; D8 G1 प्राप्त-. D1 व्यायश्च (for -व्यायाम-). Bo -योगाश्च.

20 Ś1 K1. 2 T2 M2 om. 20 (cf. v. l. 19); V1 reads and cancels 20-24. — [a]) D7 गंधवीणारथस्पर्शा. Cv as in text. — [c]) D7 T1 G1 M1. 3. 4 -दुःखानां. — [d]) K5 V1 Bo. 1. 4. 5 Da Dn2 D1-3. 5. 6. 8 विविधान्यनु°. Ca cites विधानं (as in text).

21 V1 reads and cancels 21. — [a]) D3 पानम्. — [b]) V1 अभ्युत्थानानि; Bo. 3 D2. 3. 5. 6. 8 अभ्युत्थानाच- (B3 °नं च); D1 अर्थानां पान-. K5 D1 -भोजने. — [d]) K2. 3 B2. 4. 5 Da Dn D1. 4. 6 M1. 3. 4 भवन्त्युत; T2 तपत्युत.

22 V1 reads and cancels 22. — [a]) K1 Dn2 चाप्युत्तराः; Da चाभ्यंतराः; M4 चैवातुराः. — [b]) K2. 3. 5 V1 B Da Dn D2-8 S च (for सु-). D7 मानवाः (for -दुर्बलाः). — [c]) K2-5 V1 B Da Dn

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 815
B. 12. 28. 23
K. 12. 27. 23

कुले जन्म तथा वीर्यमारोग्यं धैर्यमेव च ।
सौभाग्यमुपभोगश्च भवितव्येन लभ्यते ॥ २३
सन्ति पुत्राः सुबहवो दरिद्राणामनिच्छताम् ।
बहूनामिच्छतां नास्ति समृद्धानां विचेष्टताम् ॥ २४
व्याधिरग्निर्जलं शस्त्रं बुभुक्षा श्वापदं विषम् ।
रज्ज्वा च मरणं जन्तोरुच्चाच्च पतनं तथा ॥ २५
निर्याणं यस्य यद्दिष्टं तेन गच्छति हेतुना ।
दृश्यते नाभ्यतिक्रामन्नतिक्रान्तो न वा पुनः ॥ २६
दृश्यते हि युवैवेह विनश्यन्वसुमान्नरः ।
दरिद्रश्च परिक्लिष्टः शतवर्षो जनाधिप ॥ २७
अकिंचनाश्च दृश्यन्ते पुरुषाश्चिरजीविनः ।
समृद्धे च कुले जाता विनश्यन्ति पतंगवत् ॥ २८
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
काष्ठान्यपि हि जीर्यन्ते दरिद्राणां नराधिप ॥ २९
अहमेतत्करोमीति मन्यते कालचोदितः ।
यद्यदिष्टमसंतोषाद्दुरात्मा पापमाचरन् ॥ ३०

D3.5.8 T G2 M1.2 श्रीमंतश्. K3.5 V1 B D (except D1) S चापरे (for च तथा). Ś1 K1.2.4 शंढा; Da खंडा; D1 शंडा (for षण्ढा). —d) V1 विचित्राः कालपर्ययाः.

23 V1 reads and cancels 23. —a) K3 तथा धैर्यम्; D2.3.5.8 तथैश्वर्यम्. —b) K3 D4 वीर्यम्; K5 V1 B Da Dn D2.3.5–8 S रूपम् (for धैर्यम्). —c) K1 अपि भोगश्च; Da Dn2 D2.3 G3 उपभोगाश्च. —d) D7 भवितव्ये ह.

24 V1 reads and cancels 24. —b) B5 अलिप्सतां (for अनिच्छताम्). —cd) K2–4 विचेष्टितं (for °ष्टताम्). V1 B Dn D2.3.5.6.8 नास्ति पुत्रः समृद्धानां विचित्रं विधिचेष्टितं.

25 a) T2 शत्रुर् (for शस्त्रं). D8 व्याधिभिर्जलशस्त्रं तु. —b) K1 बुभुक्षास्वापदं; K2–5 B1.2 Da D2–5.8 M2 °क्षाश्वापदं; Dn1 G2 °क्षाश्वापदो; Dn2 °क्षा चापदं; D1 °क्षाशापदं; D6 °क्षांश्वापदं; D7 T1 °क्षा चापदो; G1.3.4 °क्षा श्वापदो; M1.4 °क्षाश्वापदा; M3 °क्ष्वाश्वापदा (for °क्षा श्वापदं). T2 दुर्भुक्तं श्वापदामिषं. —c) K2.3.5 Dn ज्वरश्; B1 लज्जा; D7 राज्यं; D8 रक्षा; T1 G1–3 जरा; G4 राजा (for रज्ज्वा). —d) B2 Da उच्चात्प्र°; Dn1 उल्बाच्च; D6 हयाच्च; D8 उध्धाच्च; T2 उच्चात्र°; G3 उर्व्याच्च (for उच्चाच्च).

26 a) K4 निर्वाणे; K5 B Da Dn D2.3.5.6.8 निर्माणे; D1 निर्वाणं (for निर्याणं). K4 V1 B Dn D2.3.5–7 यद्दृष्टं; Da1 निर्दिष्टं; Da2 निर्वेष्टं; D8 दृष्टं ते (for यद्दिष्टं). —b) Da Dn D1 T2 गच्छंति. Dn D2.3.5 सेतुना. D8 न गच्छति स्वसेतुना. — V1 Bo.3 m.5 Dn1 D2.3.5.6 read (with v. l.) 26cd twice. —c) Dn2 D7 दृश्यंते. K1.3.5 B3 Dn1 (first time).2 D4.6 (first time) T1 नाप्यति°; K4 Bo (first time).1.3 m (first time).4.5 (first time) D1.2.3.5 (last three first time).7.8 G2 नात्यति°; V1 Bo.3 m.5 Dn1 D2.3.5.6 (all second time; but V1 both times) चाप्यति°; B2 Da चात्यति°; G1 नाव्यति°; G3 नाह्यति°. —d) K2.3 Bo (first time).1.3 m (first time).4 Da Dn1 (first time).2 D2.3.5 (last three first time) न निष्क्रांतो; K4 अतिष्क्रांतो; V1 Bo.3.5 Dn1 D2.3.5.6 (all second time).8 अनिग्राह्यो; D7 T G M2 नातिक्रांतो (G2 °ते). K3.5 V1 Bo (last two both times).1.2.3 m (both times).4.5 D (except D1; Dn1 D2.3.5.6 [all both times]) S [ऽ]थ वा (G2 यथा) (for न वा).

27 a) D7.8 S च (for हि). K1 युवैवेहि; Da परैवेह; D4 युवेवेह; D7 S युवा चैव (T2 चैतत्; M चेह). —b) V1 विनश्यन्यथ वा नरः; Bo D2.3.5.8 विनश्यन्मतिमान्नरः; D1 विनश्यद्यसुमान्नरः; T1 G1.3.4 °श्यत्यसुमान्नरः; M1.3 °श्येन्वसुमान्नरः. —c) D5 परिक्लिन्नः. D7 T G1.3.4 दरिद्राश्च (G1 °द्रच्च) परिक्लिष्टाः. —d) D1 शतवर्षे; D7 T1 G M2.3 शतवर्षं; T2 शतं वर्षं. M1 शरवर्षं; M4 शतवर्ष°. K3.5 V1 B D (except D1) T2 M जरान्वितः (D7 T2 °ताः); T1 G जरा° (G1 [by corr.] शरा)तुराः (G2 °रः).

29 = (var.) 5. 34. 49. —ab) Da श्रीमतो; Bo.3 भोक्तुं लोके (by transp.). G1 शांतिर् (for शक्तिर्). —c) D1 च (for हि). K1 जीवंते. Da D2.3.5.8 जीर्यंत्यपि हि काष्ठानि; D7 S दरिद्राणां च (D7 T1 °द्रेण तु; T2 G1.3.4 °द्राणां तु) भूयिष्ठं. —d) K3.5 B Dn D2–6 च (K3.5 D4 तु; D2.3.5 हि) सर्वशः; Da महोदरैः (for नराधिप). D7 S काष्ठं वाश्मापि (D7 T1 °ष्ठमश्मभि°; T2 G2 °ष्ठमश्मापि; G1 °ष्ठधर्मापि; G3.4 °ष्ठमश्मा हि; M2 °ष्ठं चाश्मापि) जीर्यते.

30 a) D4 एव (for एतत्). —b) K5 °नोदितः. D4 — G4 om. 30c–31d. —c) Ś1 D1.6 असंतोषो;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रियोऽक्षा मृगया पानं प्रसङ्गान्निन्दिता बुधैः ।
दृश्यन्ते चापि बहवः संप्रसक्ता बहुश्रुताः ॥ ३१
इति कालेन सर्वार्थानीप्सितानीप्सितानि च ।
स्पृशन्ति सर्वभूतानि निमित्तं नोपलभ्यते ॥ ३२
वायुमाकाशमग्निं च चन्द्रादित्यावहःक्षपे ।
ज्योतींषि सरितः शैलान्कः करोति बिभर्ति वा ॥ ३३
शीतमुष्णं तथा वर्षं कालेन परिवर्तते ।
एवमेव मनुष्याणां सुखदुःखे नरर्षभ ॥ ३४
नौषधानि न शास्त्राणि न होमा न पुनर्जपाः ।
त्रायन्ते मृत्युनोपेतं जरया वापि मानवम् ॥ ३५
यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यतीयातां तद्वद्भूतसमागमः ॥ ३६
ये चापि पुरुषैः स्त्रीभिर्गीतवाद्यैरुपस्थिताः ।
ये चानाथाः परान्नादाः कालस्तेषु समक्रियः ॥ ३७
मातृपितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि कस्य ते कस्य वा वयम् ॥ ३८
नैवास्य कश्चिद्भविता नायं भवति कस्यचित् ।
पथि संगतमेवेदं दारबन्धुसुहृद्गणैः ॥ ३९ C. 12. 872 B. 12. 28. 39 K. 12. 27. 39

क्षसंतोषी. Cv as in text. —^{d}) D$_7$ दुरात्मा. D$_7$ S (G$_4$ om.) क्षुद्रम् (G$_1$ दुष्टम्) (for पापम्). K$_{3.5}$ B D (except D$_1$) T G$_{1-3}$ M$_2$ आचरेत्; M$_{1.3}$ आचरत् (for °रन्).

31 G$_4$ om. 31 (cf. v. l. 30). —^{a}) = 3. 14. 7^{a}. K$_5$ [ऽ]क्ष- (for ऽक्षा). V$_1$ B D (except D$_{1.4}$) S (G$_4$ om.) मृगयाक्षाः (D$_7$ °याक्ष-; M$_{1.3}$ °योक्षाः) स्त्रियः पानं. —^{b}) K B D (except Dn$_2$ D$_6$) प्रसंगा; M$_{1.4}$ प्रसंगे. D$_1$ त्रिर्दिता (sic); M$_1$ निंदितां. M$_3$ प्रसंगो- न्निंदिता बुधैः. —^{c}) K$_3$ V$_1$ B Dn$_2$ D$_{2.3.5.6.8}$ बहव- (Dn$_2$ पुरुषा)श्चात्र; K$_5$ D$_{4.7}$ S (G$_4$ om.) चात्र बहवः. —^{d}) K$_{1.2}$ Dn$_2$ D$_6$ T$_2$ M$_2$ संप्रयुक्ता; V$_1$ B Da D$_{2.3.5.8}$ सुप्रयुक्ता; G$_3$ संप्रसक्तं; M$_{1.3}$ सं- प्रवृत्ता (for संप्रसक्ता).

32 ^{a}) D$_7$ संमत्ता; T$_2$ सर्वार्था (for सर्वार्थान्). —^{b}) K$_{3.5}$ B (except B$_4$) Dn D$_{2-6.8}$ ईप्सितानी- प्सितानिह; Da$_1$ corrupt; Da$_2$ ईप्सितानि च दृश्यते; D$_7$ निर्मितानि सितान्यह (sic); T$_2$ निर्मितानीप्सितानपि; G M ईप्सितानीप्सितानपि. —^{c}) Da$_1$ दृश्यंते (for स्पृशन्ति). Da$_2$ सर्वभूतानि नमितं. —^{d}) B$_1$ D$_6$ नोपपद्यते; D$_7$ नोपलक्ष्यते. K$_3$ निमित्तेनोपलभ्यते; Cv as in text.

33 ^{a}) Ś$_1$ K$_1$ T$_2$ वायुर्. K$_1$ V$_1$ D$_7$ T$_2$ अग्निश्. —^{b}) K$_{2-5}$ B$_2$ Dn D$_{1-3.5-7}$ -क्षये; T$_2$ -क्षपाः (for -क्षपे). Da चंद्रादित्यारहःक्षपाः. —^{c}) Ś$_1$ K$_1$ शैलाः; Da$_1$ चैलान्. —^{d}) V$_1$ B$_{0.1.3-5}$ Dn D$_{2.3.5.8}$ G च; D$_6$ कः (for वा).

34 ^{a}) B$_4$ [अ]मर्षं (for वर्षं). — D$_4$ om. 34^{c}–35^{b}. —^{c}) D$_{3.5.6}$ एतन् (for एव). —^{d}) Da Dn$_2$ सुखं दुःखं. K$_4$ D$_2$ नरर्षभः; B$_2$ Da नराधिप.

35 D$_4$ om. 35^{ab} (cf. v. l. 34). —^{a}) K$_4$ नौष- धीनि; D$_3$ औषधानि. D$_3$ च (for न). K$_{2.3.5}$ Dn मंत्राश्च; K$_4$ B$_{3.5}$ Da D$_1$ G$_{1.3}$ M$_{2.4}$ शस्त्राणि; D$_6$ चास्त्राणि. —^{b}) Ś$_1$ K$_1$ होमानि; D$_7$ भूमौ न; T$_1$ G$_{1.3.4}$ होमो न (for होमा न). K$_5$ जपः. —^{c}) Ś$_1$ D$_1$ त्रायंति; G$_4$ त्रायते. —^{d}) K$_{2.3.5}$ B$_{3.5}$ Da Dn D$_{2.3.5.8}$ चापि (for वापि).

36 = (var.) B. 12. 174. 15; Rām. 2. 105. 26; Hitopadeśa IV. 73. —^{c}) Ś$_1$ K$_1$ समीत्य. K$_2$ व्यती- तायां; K$_{3.5}$ V$_1$ B Da Dn D$_{2.3.5-8}$ S व्यपेयातां. —^{d}) D$_1$ -समागमाः.

37 K$_2$ Da$_1$ om. (hapl.) 37^{ab}. —^{a}) K$_{3.4}$ V$_1$ B Da$_2$ Dn D$_{1-3.5.6.8}$ चैव पुरुषाः. D$_7$ T G ये च निष्पुरुषै- र्नृत्त(T$_1$ °गीत-; T$_2$ °नृत्य-); M$_1$ ये च निष्पुरुषैस्तूर्यैर्. —^{b}) K$_5$ D$_4$ गीतशब्दैर्; T$_1$ नृत्तवाद्यैर्. K$_5$ अपेक्षिताः. — D$_6$ om. 37^{c}–38^{b}. —^{c}) Da वानाथाः; D$_7$ G$_2$ च नाथाः; T$_2$ सनाथाः (for चानाथाः). D$_7$ G$_3$ परंनादाः; T$_2$ परेनास्थाः. —^{d}) D$_{2.3.5.8}$ तेषां (for तेषु).

38 = 11. 2. 12: (var.) B. 12. 321. 85. D$_6$ om. 38^{ab} (cf. v. l. 37). —^{a}) Ś$_1$ K$_5$ मातापितृ-. —^{c}) D$_6$ येषु येषु. T [अ]भ्य(T$_2$ [अ]प्य)तीतानि; G व्यती(G$_1$ °नी)तेषु. D$_7$ संसारेभ्यस्त्वभीतानि. —^{d}) D$_6$ देहस्य (for ते कस्य). B$_2$ D$_7$ S तेषु तेषु (T$_2$ तानि तानि; G तानि तेषु) तदा तदा.

39 ^{a}) Da S भवति (for भविता). — V$_1$ reads from भवति up to 41^{c} on marg. —^{c}) Da यस्य सं-; D$_7$ यथायं; D$_3$ यदि सं- (for पथि सं-). G$_1$ एवैतं (for एवेदं). —^{d}) D$_1$ धारबंधु-; D$_6$ दारबंध-; T$_2$ पुत्रदार-. B$_1$ Dn D$_{2.3.5.7.8}$ -सुहृज्जनैः.

14

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C 12. 872 B. 12. 28. 40 K. 12. 27. 40 क्वाहं क्वासि गमिष्यामि को न्वहं किमिहास्थितः ।
कस्मात्कमनुशोचेयमित्येवं स्थापयेन्मनः ।
अनित्ये प्रियसंवासे संसारे चक्रवद्गतौ ॥ ४०
न दृष्टपूर्वं प्रत्यक्षं परलोकं विदुर्बुधाः ।
आगमांस्त्वनतिक्रम्य श्रद्धातव्यं बुभूषता ॥ ४१
कुर्वीत पितृदैवत्यं धर्माणि च समाचरेत् ।
यजेच्च विद्वान्विधिवत्त्रिवर्गं चाप्यनुव्रजेत् ॥ ४२
संनिमज्जज्जगदिदं गम्भीरे कालसागरे ।
जरामृत्युमहाग्राहे न कश्चिदवबुध्यते ॥ ४३
आयुर्वेदमधीयानाः केवलं सपरिग्रहम् ।
दृश्यन्ते बहवो वैद्या व्याधिभिः समभिप्लुताः ॥ ४४
ते पिबन्तः कषायांश्च सर्पींषि विविधानि च ।
न मृत्युमतिवर्तन्ते वेलामिव महोदधिः ॥ ४५
रसायनविदश्चैव सुप्रयुक्तरसायनाः ।
दृश्यन्ते जरया भग्ना नगा नागैरिवोत्तमैः ॥ ४६
तथैव तपसोपेताः स्वाध्यायाभ्यसने रताः ।
दातारो यज्ञशीलाश्च न तरन्ति जरान्तकौ ॥ ४७
न ह्यहानि निवर्तन्ते न मासा न पुनः समाः ।
जातानां सर्वभूतानां न पक्षा न पुनः क्षपाः ॥ ४८
सोऽयं विपुलमध्वानं कालेन ध्रुवमध्रुवः ।
नरोऽवशः समभ्येति सर्वभूतनिषेवितम् ॥ ४९
देहो वा जीवतोऽभ्येति जीवो वाभ्येति देहतः ।

40 V_1 reads 40 on marg. — ^{a}) K_1 कामे कामि (sic); K_2 क्वासि क्वासि; K_{3-5} B Da Dn D_{2-8} S क्वासे (D_6 क्वासि; D_7 क्वासु; T_1 G $M_{1.3.4}$ क्वासौ; T_2 क्वासै) क्व च; V_1 क्वासं क्व च; D_1 कोस्मि कोस्मि. — ^{b}) Da किं त्वहं; T_2 को न्वयं. B $D_{2.3.5.8}$ [आ]गतः; D_7 S (except $M_{1.3}$) स्थितः (for [आ]स्थितः). — ^{c}) D_7 T_2 G_3 M_4 तस्मात्. $K_{2.3}$ V_1 B Da Dn_2 $D_{2.3.5-8}$ S किम् (for कम्). D_1 अन्वशोचेयं; T G अनुशोचेहम्. — ^{d}) $K_{1.4}$ G_1 स्थापये. G_1 जनः (for मनः). — ^{e}) D_1 अनित्यं. B_1 T_1 $G_{3.4}$ प्रियसंसारे. — ^{f}) D_7 S चक्रवद्गते. — After 40, N ins. (cf. 39^{cd}):

37* पथि संगतमेवैतद्भ्राता माता पिता सखा ।

[Da एवेदं. B_2 Da माता भ्राता (by transp.).]

41 V_1 reads 41^{abc} on marg. — ^{a}) V_1 अदृष्टपूर्वं; Da न दृष्टरूपं. — ^{b}) D_1 परिलोकं. — ^{d}) D_4 विधातव्यं.

42 ^{a}) K_5 कुर्वंता. D_7 पितृदेवत्य°. — ^{b}) K_2 V_1 D_1 कर्माणि च; $K_{3.5}$ $Bo_{1.3}$ Dn $D_{2.3.5}$ $M_{1.3}$ धर्म्याणि च; B_2 Da धर्मं चैव; B_4 कर्म्याणि च; T_1 G धर्मानपि. — ^{c}) K_4 $D_{1.4}$ S यजेत; D_7 यजेतद्. B_2 वेदविद्विद्वांस्; T G विधिवद्विद्वांस् (by transp.). — ^{d}) Da त्रिवर्गंश्. K_1 अनुब्रवीत्; K_5 V_1 B Da Dn $D_{2.3.5.6.8}$ उपाचरेत् ((for अनुव्रजेत्).

43 ^{a}) $K_{2.3}$ Bo_{-4} Da Dn_2 G_{1-3} M_2 संनिमज्जेज्; K_5 D_3 संनिमज्जं; T_2 सुनिमज्जेज्. — ^{b}) V_1 $G_{1.2}$ लोकसागरे. — ^{c}) Da D_7 S जन्ममृत्यु(T_2 °नाश)जराग्राहे. — ^{d}) D_7 न किंचिद्.

44 ^{a}) D_7 S अधीयंतः. — ^{b}) K_2 B Da Dn $D_{3.5.6.8}$ सपरिग्रहाः (Da_1 °हः); $G_{1.2}$ स्वपरिग्रहं. — ^{d}) Bo_5 समवप्लुताः; T_2 तेपि विप्लुताः.

45 45^{ab} = B. 12. 331. 32^{ab}. — ^{a}) D_1 ते पिबतः कषायाश्च (sic). — ^{c}) D_7 अनु°; M अभि° (for अति°). — ^{d}) G_3 M_3 महोदधीः.

46 ^{b}) D_3 सुप्रयुक्ता. 46^{cd} = B. 12. 331. 32^{cd}. — ^{d}) D_7 T G_{2-4} M_4 नागा (for नगा).

47 ^{a}) $K_{3.5}$ D_4 युक्ताः (for [उ]पेताः). — ^{b}) $Ś_1$ (before corr.) स्वाध्यायाभ्यासेन; K_1 °याद्यासने; D_7 °याध्यायने; T_1 G_{2-4} M °याध्ययने; T_2 °यनव्रते; G_1 °याध्यसने. — ^{d}) Da भवंति (for तरन्ति). D_1 जगंतकौ; D_7 जरांतिकौ; G_1 जनांतकौ.

48 ^{a}) Da_1 न ह्यहा न; D_7 S अहानि न; C^v as in text. B_3 नाहानि परिवर्तंते. — ^{b}) G_3 मनसा (for न मासा). D_7 क्षमः; S क्षपाः (for समाः). — ^{c}) K_3 om. (hapl.) from तानां up to सर्वभू (in 49^d). — ^{d}) Da तपसा (for न पक्षा). D_7 S न पुनर्वै (G_1 नव्य*र्वै; $M_{1.3.4}$ न पुनस्तैः) समागमः (D_7 °माः).

49 K_3 om. up to सर्वभू (cf. v. l. 48). — ^{b}) D_7 Da $D_{4.7}$ T_2 $G_{2.3}$ M_2 अध्रुवं (for अध्रुवः). — ^{c}) D_7 स्रोतस्यैव; S स्रोतसैव (T_2 M °सेव) (for नरोऽवशः). Da corrupt. — ^{d}) $D_{1.7}$ सर्वभूता(D_7 °तश्चा)निषेवितं; M_2 सर्वभूतानि कर्षति.

50 ^{a}) D_3 देहोप°; C^v as in text. D_7 S जीवि°

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पथि संगतमेवेदं दारैरन्यैश्च बन्धुभिः ॥ ५०
नायमत्यन्तसंवासो लभ्यते जातु केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥ ५१
क्व नु तेऽद्य पिता राजन्क्व नु तेऽद्य पितामहः ।
न त्वं पश्यसि तानद्य न त्वां पश्यन्ति तेऽपि च ॥ ५२
न ह्येव पुरुषो द्रष्टा स्वर्गस्य नरकस्य वा ।
आगमस्तु सतां चक्षुर्नृपते तमिहाचर ॥ ५३
चरितब्रह्मचर्यो हि प्रजायेत यजेत च ।
पितृदेवमहर्षीणामानृण्यायानसूयकः ॥ ५४
स यज्ञशीलः प्रजने निविष्टः
प्रागब्रह्मचारी प्रविभक्तपक्षः ।
आराधयन्स्वर्गमिमं च लोकं
परं च मुक्त्वा हृदयव्यलीकम् ॥ ५५
सम्यग्घि धर्मं चरतो नृपस्य
द्रव्याणि चाप्याहरतो यथावत् ।
प्रवृत्तचक्रस्य यशोऽभिवर्धते
सर्वेषु लोकेषु चराचरेषु ॥ ५६

व्यास उवाच

इत्येवमाज्ञाय विदेहराजो
वाक्यं समग्रं परिपूर्णहेतुः । C. 12. 891 B. 12. 28. 58 K. 12. 27. 58

ताद्; Cv as in text. $Ś_{1}$ (by corr.) K_{1} Da_{2} Dn_{1} D_{4} Ca [ऽ]त्यैति; D_{7} योति; T G_{4} वेति; G_{1} $M_{1.3.4}$ त्यैति; G_{2} M_{2} त्येति; Cv cites अप्येति. G_{3} देहो वा जीविताद्वैती. —^{b}) D_{7} T_{1} G देही (for जीवो). $Ś_{1}$ (by corr.) K_{1} Da Dn_{1} D_{4} [अ]त्येति; D_{7} T_{1} G [अ]प्येति; T_{2} [अ]प्याति; M त्यैति (for [अ]भ्येति). K_{3} देवतः. —^{c}) = 39^{c}. D_{7} पति· (for पथि). T $G_{1.2}$ $M_{1.3}$ संगमम्. V_{1} B Da $D_{2.3.5.6.8}$ एवैतद् (Da_{2} °व). —^{d}) $K_{3.5}$ एतैश् (अन्यैश्).

51 = Hitopadeśa IV. 76. V_{1} reads 51^{ab} on marg. —^{a}) D_{7} अभ्येति (for अत्यन्त·). —^{b}) Dn_{2} येन (for जातु). — D_{6} om. (hapl.) 51^{cd}. —^{d}) G [अ]न्यत्र (for [अ]न्येन).

52 = 12. 105. 17. —^{b}) $K_{2.3}$ $Bo._{1.3-5}$ D (except D_{7}) T_{2} G_{2} M पितामहाः; K_{4} पिता सह. — D_{1} om. from 52^{c} up to नृपते (in 53^{d}). —^{c}) Dn_{2} पश्यति. —^{d}) K_{1} T_{2} त्वा (for त्वां). V_{1} B Dn $D_{2.3.5.6}$ तेनघ (B_{1} °घाः); Da चापरे; D_{3} तेन वः; T_{2} ते क्वचित्. D_{7} त्वामपश्यंति तेपि च.

53 D_{1} om. up to नृपते (cf. v. l. 52). —^{a}) $K_{2.3}$ V_{1} $Bo._{1.3-5}$ Dn $D_{2.3.5-8}$ चैव; B_{2} Da S चापि (for ह्येव). Da द्रेष्टा; D_{7} दृष्टो; T_{1} G_{4} दृष्टा; $G_{1.3}$ दृष्ट्वा (for द्रष्टा). —^{b}) K $B_{1.2}$ Da Dn D_{4} M_{4} च (for वा). —^{c}) $Ś_{1}$ $K_{1.4}$ M_{4} च (for तु). Da_{1} दृष्ट्वा; D_{7} चक्रुर् (for चक्षुर्). —^{d}) Bo तमिवाचर; Da त्वादिहावर; D_{7} तपमिहापर (corrupt).

54 ^{a}) D_{6} T_{1} G ·व्रत· (for ·ब्रह्म·). Dn_{2} ·चर्योसि; T_{2} ·चर्योपि; G_{1} ·चर्योभि·. —^{b}) D_{7} पर्ययेत; G_{2} प्रजायेते. K_{3} Dn_{1} यजेति; K_{4} $D_{2.3}$ जयेत; D_{3} यजंति. Da D_{7} वा (for च). Cv as in text. —^{c}) K_{5} V_{1} $B_{1.3.4}$ (m as in text). $_{5}$ Da Dn $D_{2.3.5.6.8}$ T_{2} ·मनुष्याणाम्. —^{d}) $K_{2.3.5}$ V_{1} B (except Bo) Dn_{2} $D_{2-6.8}$ T_{2} आनृण्याद्; D_{1} corrupt; M_{2} आनृण्याच्च. K_{5} अनुसूयकः. D_{7} आनृणोनसतोर्थितः (sic).

55 ^{a}) B_{2} यज्ञशीली; Da °शीलां. —^{b}) K_{2} प्रविभक्तकामः; V_{1} B Da Dn $D_{2-6.8}$ प्रविवि(V_{1} °भ)क्तचक्षुः; D_{7} S प्रविभक्तभैक्षः (M_{1} °भक्तः; $M_{2.3}$ °भक्षः; M_{4} °मंत्रः). —^{c}) K_{1} आराधयं; $K_{2.3.5}$ B_{2-4} Dn $D_{2.3.5.6.8}$ आराधयेत्; Da D_{4} T_{1} G_{3} M °धय; D_{1} °दयं; D_{7} आचारयन्. D_{1} इदं (for इमं). —^{d}) V_{1} विमुक्त्वा (for च मुक्त्वा). T $G_{3.4}$ M ·व्यलीकं. $D_{3.6}$ परं मुक्त्वा हृदयस्य व्यलीकं.

56 ^{a}) $K_{2.3}$ $Bo._{1.3-5}$ Dn $D_{2.3.5.8}$ समं हि; K_{5} समं च; V_{1} S सम्यक्स्व·; D_{5} सम्यग्वि·; D_{7} सम्यक्स (for सम्यग्घि). B_{2} Da M_{2} नरस्य (for नृपस्य). —^{b}) $K_{2.3.5}$ B_{2} Dn_{1} $D_{4.7.8}$ S चाभ्या(G_{2} °द्या)हरतो; V_{1} $Bo._{1.3-5}$ चास्या°; D_{4} चारंभवतो; D_{1} चाप्यहति (sic). D_{7} वयत् (for यथावत्). —^{c}) $K_{2.4}$ D_{1} T_{2} G प्रवृद्धचक्रस्य; $K_{3.5}$ $B_{1.3-5}$ Dn $D_{2.3.5.6.8}$ प्रवृत्तधर्मस्य; D_{4} corrupt. $D_{2-5.8}$ वि(D_{4} हि)वर्धते; D_{7} विवर्धेत्; S [ऽ]भिवर्धेत्. —^{d}) $D_{2.3.5}$ लोकेषु सर्वेषु (by transp.).

57 Before 57, all MSS. (except $B_{1.2}$ Da Dn_{1}) om. the ref. —^{a}) D_{7} T G Cnp आकर्ण्य; M_{3} अज्ञाय. $Ś_{1}$ K_{1} B_{1} विदेहराजा; D_{6} विदर्भराजो. —^{b}) $K_{2.3.5}$ Dn_{2} $D_{4.5}$ T_{2} °हेतु; $B_{1.2}$ $D_{2.3.6-8}$ G_{4} M_{4}

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

12. 691
. 12. 29. 58
. 12. 27. 58

अश्मानमामन्त्र्य विशुद्धबुद्धि-
र्ययौ गृहं स्वं प्रति शान्तशोकः ॥ ५७
तथा त्वमप्यच्युत मुञ्च शोक-
मुत्तिष्ठ शक्रोपम हर्षमेहि ।
क्षात्रेण धर्मेण मही जिता ते
तां भुङ्क्ष्व कुन्तीसुत मा विषादीः ॥ ५८

इति श्रीमहाभारते शान्तिपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

वैशंपायन उवाच ।
अव्याहरति कौन्तेये धर्मपुत्रे युधिष्ठिरे ।
गुडाकेशो हृषीकेशमभ्यभाषत पाण्डवः ॥ १
ज्ञातिशोकाभिसंतप्तो धर्मराजः परंतपः ।
एष शोकार्णवे मग्नस्तमाश्वासय माधव ॥ २
सर्वे स्म ते संशयिताः पुनरेव जनार्दन ।
अस्य शोकं महाबाहो प्रणाशयितुमर्हसि ॥ ३
एवमुक्तस्तु गोविन्दो विजयेन महात्मना ।
पर्यवर्तत राजानं पुण्डरीकेक्षणोऽच्युतः ॥ ४
अनतिक्रमणीयो हि धर्मराजस्य केशवः ।

°हेतुं; D_a °केतुः. — ^{c}) B_3 D_a अस्मानम्; D_1 आश्मानम्. $Ś_1$ D_1 विबुद्ध-; D_7 विशुद्धि- (for विशुद्ध-). — ^{d}) K_4 गृहे स्वं; D_a गृहांश्च; D_7 गृहस्थं. K_3 प्रविमृज्य शोकं; D_a प्रति शांतबुद्धः.

58 ^{a}) D_a तथा तम्; D_{n2} यथा त्वस्; D_7 अतस्त्वम्. B_1 असि (for अपि). D_{a1} [अ]प्रतिमुंच; D_7 T G [अ]द्य विमुच्य (G_4 °क्त); M [अ]च्युत मुच्य (for [अ]च्युत मुञ्च). C_a cites अच्युतः. — ^{c}) K_4 B_1 D_1 क्षत्रेण. K_5 D_4 जितेयं. — ^{d}) M_2 तं (for तां). $K_{2.4}$ मा विषीद; $K_{3.5}$ V_1 B D_a D_n D_{2-8} S मावमंस्थाः; D_1 मा विषीदः.

Colophon. — *Sub-parvan* : K_{2-5} V_1 B D_a D_{n1} D_{1-8} T_2 $G_{1.2}$ M राजधर्म. — *Adhy. name* : B_2 अश्मगीता; D_n व्यासवाक्यं; D_7 G $M_{2.4}$ अश्मजनकसंवादः; T_1 जनकसंवादः. — *Adhy. no.* (figures, words or both): B_1 22; $B_{2.4}$ D_{a1} D_n $D_{2.7}$ S 28 (as in text); D_8 27. — *Śloka no.* : D_{n1} 59.

29

☞ With st. 16ff. (the Ṣoḍaśarājakīyam), cf. B. 7. 55. 37—70. 25.

1 $K_{1.2}$ om. 1–3. $Ś_1$ reads 1–3 on marg. D_8 om. the ref. After the ref., $Ś_1$ ins. ॐ. — ^{a}) D_a $D_{1.2.4}$ T_2 कौंतेय; D_n राजेंद्रे; D_6 राजेंद्र. — ^{b}) K_4 V_1 $D_{2.3.8}$ M_4 धर्मराजे; D_5 धर्मजे च. — V_1 D_3 read 1^c–2^b on marg. — After 1, D_8 ins. 38*.

2 $K_{1.2}$ om. 2 (cf. v. l. 1). $Ś_1$ reads 2 on marg.; V_1 D_3 read 2^{ab} on marg. Before 2, K_{3-5} B (B_4 damaged) D_a D_n $D_{1-3.5.6}$ S (except M_4) ins. अर्जुन उवाच. — K_5 D_5 ins. after the ref.: D_8 after 1:

38* शोकदावानलजल शोककूपप्रपूरक ।
शोकवल्लीकुठाराद्य शोकनाशनकीर्तन ।

— ^{a}) V_1 $B_{0.1}$ D_6 -तप्तोयं (for -संतप्तो). — ^{b}) $K_{3.5}$ $B_{0.1.3-5}$ D_n $D_{4.6}$ धर्मपुत्रः (or °त्रो). K_4 $B_{0.1.3-5}$ $D_{1-3.5.6.8}$ युधिष्ठिरः (for परंतपः). — ^{c}) $Ś_1$ D_a एक; K_4 $B_{1.3}$ $D_{2.3.5.8}$ एवं (for एष). — ^{d}) D_7 पांडवं (for माधव).

3 $Ś_1$ reads 3 on marg. — ^{a}) $Ś_1$ D_1 G_3 M_4 सर्वेस्मै; K_3 सर्वेस्मि; D_a सर्वे स्म; D_4 सर्वे स्मे; G_2 सर्वस्मै (for सर्वे स्म). M_3 वै (for ते). — ^{c}) B_2 D_a शोकमस्य (by transp.). D_7 S महाप्राज्ञ (for °बाहो).

C. 12. 1012 B. 12. 29. 119 K. 12. 28. 119 स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ११२
[14] रन्तिदेवं च साङ्कृत्यं मृतं शुश्रुम सृञ्जय ।
सम्यगाराध्य यः शक्रं वरं लेभे महायशाः ॥ ११३
अन्नं च नो बहु भवेदतिथींश्च लभेमहि ।
श्रद्धा च नो मा व्यगमन्मा च याचिष्म कंचन ११४
उपातिष्ठन्त पशवः स्वयं तं संशितव्रतम् ।
ग्राम्यारण्या महात्मानं रन्तिदेवं यशस्विनम् ॥ ११५
महानदी चर्मराशेरुत्क्लेदात्सुस्रुवे यतः ।
ततश्चर्मण्वतीत्येवं विख्याता सा महानदी ॥ ११६
ब्राह्मणेभ्यो ददौ निष्कान्सदसि प्रतते नृपः ।
तुभ्यं तुभ्यं निष्कमिति यत्राक्रोशन्ति वै द्विजाः ।
सहस्रं तुभ्यमित्युक्त्वा ब्राह्मणान्स्म प्रपद्यते ॥ ११७
अन्वाहार्योपकरणं द्रव्योपकरणं च यत् ।
घटाः स्थाल्यः कटाहाश्च पात्र्यश्च पिठरा अपि ।
न तत्किंचिदसौवर्णं रन्तिदेवस्य धीमतः ॥ ११८
साङ्कृते रन्तिदेवस्य यां रात्रिमवसद्गृहे ।
आलभ्यन्त शतं गावः सहस्राणि च विंशतिः ॥ ११९

रजसो ($M_{2.4}$ °यसो).

112 ^{a}) Da_1 संजय. — T_1 $G_{1.3.4}$ om. 112^{bc}. — ^{b}) D_1 तया ; T_2 तु यः. — ^{c}) D_7 पुण्यकृतस्. $D_{3.5.7.8}$ T_2 G_2 M तुभ्यं (for चैव). — After 112, D_7 repeats 41* (cf. v. l. 34, 45, 63, 73, 86, 97, 103).

113 With 113-121, cf. B. 7. 67. 1-21. — ^{b}) V_1 $Bo_{1.4.5}$ Dn_2 G_2 $M_{2.4}$ सृंजय शुश्रुम (by transp.); Da D_7 T $G_{1.3.4}$ सृं(Da सं)जय शुश्रुमः. — ^{c}) K_3 शक्र- ; V_1 B Dn $D_{2.3.5.6.8}$ शक्राद्. D_7 समाराध्य च यः शक्रं. — ^{d}) K_5 Da D_7 S वरान् (T_2 स वरान् hypermetric). K_3 महाजसाः ; B_2 damaged ; Da_2 °यसा ; Dn °तपाः.

114 ^{a}) K_3 नौ (for नो). — ^{b}) K_1 D_8 अतिथिंश्च. Ś$_1$ K_1 लभेमहे ; Da_2 °म ह. — ^{c}) D_6 मां (for मा). K_3 om. from व्यगमन् up to रन्तिदेवं (in 115^{d}). K_1 विगमं ; D_7 T_1 G_{2-4} व्यपगान् ; $M_{1.3}$ [अ]त्यगमे ; M_4 [अ]तिगमे. — ^{d}) $Bo_{1.3.4}$ याचिस्म (sic). T_2 M_2 किंचन.

115 K_3 om. up to रन्तिदेवं (cf. v. l. 114). — ^{a}) K_4 T_2 उपा(T_2 °प)तिष्ठंति ; K_5 V_1 B Da Dn_1 $D_{4.6}$ उपा(Da_1 °प)तिष्ठंश्च ; $D_{1-3.5}$ उपतिष्ठं(D_2 °ष्ठ)त. — ^{b}) V_1 Bo_1 संयतं ; D_1 स्वयं ते ; D_7 स्वयं ता. K_4 शंशित- ; D_1 सांशित- ; $D_{5.6.8}$ शंसित-. — ^{c}) Da_1 ग्राम्यारण्य- ; G_1 ग्रामारण्या.

116 ^{b}) Ś$_1$ K_1 उत्क्लेशात् ; Da ककुदात् ; M_2 उत्क्रमात् ; M_4 उत्स्वेदात्. K_2 B_2 Dn_2 ससृजे ; K_{3-5} V_1 सुश्रुवे ; Bo_1 शुश्रुवे ; B_3 $D_{2.3.5.6.8}$ जायते ; D_1 सस्रुवै ; D_4 सुस्रुवा. B_1 तयः (for यतः). — ^{c}) D_7 एतश् (for ततश्). $B_{2.4}$ D_4 $G_{1.3.4}$ [ए]व (for [ए]वं). — ^{d}) $D_{3.5.8}$ व्याख्याता. K_4 च (for सा). D_4 महानदा.

117 K_3 om. (hapl.) 117^{abcde}. — ^{a}) D_7 महानिष्का ; D_8 ददौ निष्ठान् ; T_1 $G_{1.3}$ M_3 [ऽ]ददा(G_1 °द)न्निष्कान् ; M_4 ददौ निष्कं. — ^{b}) K_1 M_2 प्रततो ; V_1 प्रसृते ; Da_1 प्रनते ; D_7 प्रददौ ; T $G_{1.3.4}$ M_4 प्रयतो ; G_2 प्रथमो ; $M_{1.3}$ प्रयते (for प्रतते). Da_1 Dn D_7 T_2 $M_{1.3}$ नृप. — ^{c}) B_1 सत्यं (for the first तुभ्यं). K_5 D_4 निष्क इति ; D_7 इती तुभ्यं ; T_2 इति यदा ; G_3 तुभ्यमिति (for निष्कमिति). K_2 Dn D_6 तुभ्यं निष्कं तुभ्यं निष्कम्. — ^{d}) K_2 Dn D_6 इति क्रोशंति ; V_1 B $D_{1-3.5}$ S यदा(T_2 तदा- ; M_2 यथा)क्रोशंति ; Da तत्राक्रोशंत ; D_4 यत्राक्रोशंत ; D_7 यदोत्क्रोशंति (for यत्राक्रोशन्ति). D_1 G_1 द्विजः. — ^{f}) $K_{1.4}$ B_2 D_1 T_1 स प्रपद्यते ; $K_{2.3.5}$ $Bo_{1.5}$ Dn D_6 संप्रपद्यते ; V_1 Da समपद्यत ; T_2 च प्रपद्यते ; G प्रतिपद्यते.

118 ^{ab}) M_2 तथा (for च यत्). D_7 अन्वाहार्यप्रकरणं द्रव्यप्रकरणं च यत् ; T_2 अन्वाहार्यों पुरो भांडं कांचनं च बभूव यत्. — ^{c}) K_1 Da घंटाः ; D_7 यस्य (for घटाः). V_1 $K_{3.5}$ $Bo_{-3.5}$ Dn D_{2-8} S पात्र्यः (M_2 °त्र्याः) ; V_1 पात्रे ; B_4 पत्र्यः ; Da पात्र- (for स्थाल्यः). V_1 B Da Dn $D_{2.3.5-8}$ S क(V_1 T_2 घ)टाहानि. D_1 पात्राण्यनेकरूपाणि. — ^{d}) K_1 corrupt ; $K_{2.4}$ पात्र्याश्च ; K_3 V_1 B D S स्थाल्यश्च ; K_5 स्थाल्याश्च. Ś$_1$ पिठिरा अपि ; $K_{3.5}$ D_4 विविधा अपि ; V_1 B Da Dn $D_{2.3.5-8}$ S पिठराणि च ; D_1 पिठराणिति. — ^{e}) K_2 ततः ; $K_{3.5}$ V_1 B D (except D_1) S नासीत् (for न तत्). — ^{f}) Da_1 °देवश्च. Ś$_1$ (by corr.) धर्मतः.

119 ^{b}) K_{2-4} B_2 Da_1 D_4 ये ; Da_2 यो (for यां). Ś$_1$ $K_{2.4}$ V_1 B Da Dn $D_{1-3.5-8}$ T G $M_{1.2}$ अवसन् ;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

तत्र स्म सूदाः क्रोशन्ति सुमृष्टमणिकुण्डलाः ।
सूपभूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा ॥ १२०
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ १२१
[15] सगरं च महात्मानं मृतं शुश्रुम सृञ्जय ।
ऐक्ष्वाकं पुरुषव्याघ्रमतिमानुषविक्रमम् ॥ १२२
षष्टिः पुत्रसहस्राणि यं यान्तं पृष्ठतोऽन्वयुः ।
नक्षत्रराजं वर्षान्ते व्यभ्रे ज्योतिर्गणा इव ॥ १२३
एकच्छत्रा मही यस्य प्रणता ह्यभवत्पुरा ।
योऽश्वमेधसहस्रेण तर्पयामास देवताः ॥ १२४
यः प्रादात्काञ्चनस्तम्भं प्रासादं सर्वकाञ्चनम् ।
पूर्णं पद्मदलाक्षीणां स्त्रीणां शयनसंकुलम् ॥ १२५
द्विजातिभ्योऽनुरूपेभ्यः कामानुच्चावचांस्तथा ।
यस्यादेशेन तद्वित्तं व्यभजन्त द्विजातयः ॥ १२६
खानयामास यः कोपात्पृथिवीं सागराङ्किताम् ।
यस्य नाम्ना समुद्रश्च सागरत्वमुपागतः ॥ १२७
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ १२८ C. 12. 1029 B. 12. 29. 136 K. 12. 28. 136

K1 अवसं; D4 अवसान्; M4 अतिथिर् (for अवसद् as in K3.5 M3). — In K1, 119^{cd} is written and cancelled. — ^{c}) K3 अलभेत; K4 आलभंत; V1 D2.3.5.8 अलभ्यंत; Da अलभ्यत; D1 अलभ्यतु; D4 अलभंत; D7 अलभ्यंते; T G आलभ्यंते. D7 T G तदा (for शतं). — ^{d}) T G1.3.4 [पु]क- (for च). B1 D4 M2 विंशति. D7 सहस्रा ह्येकविंशति.

120 ^{a}) Bo यत्र (for तत्र). B2 सूदाश्च (for स्म सूदाः). — ^{c}) K2-5 B1 D3 सूपं (for सूप-). D7 आनीतं; D8 अस्निग्धं; T G अश्नीत. Da सूपभूयिष्ठभोक्तव्यं. — ^{d}) K1 भोज्यं (for मांसं). D7 S (except M2) यथापुरं.

121 T1 G om. 121^{bc}. — ^{c}) D7 पुण्यकृतस् (for °तरश्). D2.7 T2 तुभ्यं (for चैव).

122 D7 om. (hapl.) 122–136. — ^{a}) K5 महाबाहुं (for °त्मानं). — ^{b}) V1 Bo.4 Da2 T G2.4 M1-3 संजय शुश्रुम (B4 Da2 T G4 °मः); Da1 G1.3 संजय शुश्रुमः. — ^{c}) K5 Bo.2-5 Dn1 G1 ऐक्ष्वाकुं; V1 B1 Dn2 D2.3.5.6 M इक्ष्वाकुं; Da D3 इक्ष्वाकु-; D1 चेक्ष्वाकं; D4 एक्ष्वाकं. — ^{d}) T1 G1.3.4 -विग्रहं (for -विक्रमम्). Ś1 K1 अतिमानातिविभ्रमम्.

123 D7 om. 123 (cf. v. l. 122). 123^{ab} = (var.) Rām. 1. 5. 2^{cd}. — ^{a}) K5 B1 D1.3 षष्टि-; V1 Dn2 षष्ठि-; B3 Da1 D5 षष्टिं. B5 शत- (for पुत्र-). Ś1 K1 -सहस्राणां. — ^{b}) D6 यांतिम्; D3 यातम् (for यान्तं). V1 Bo.1.3-5 Da Dn D2.3.5.6.8 अनुजग्मिरे (Bo °य)ग्मिरे; B2 S पर्यवारयन् (for पृष्ठतोऽन्वयुः). — ^{c}) D1 °राज-; D6 °नाथं; G1 °राजा. — ^{d}) T1 G व्यभ्रं.

124 D7 om. 124 (cf. v. l. 122). — ^{b}) K2.3.5 V1 Bo.3-5 Da Dn D2.3.5.6 T1 G3.4 प्रतापादभ°; B2 D3 T2 G1 M प्रभावादभ°; G2 प्रसादादभ°. — For 124^{c}–125^{b}, cf. AB. 8. 22. — ^{c}) B2 D1 S सोश्वमेध- (D1 °धे); Da साश्वमेध-; D4 याश्वमेध-. Da1 -सहस्राणि (for °स्रेण). — ^{d}) T G वै सुरान् (for देवताः).

125 D7 om. 125 (cf. v. l. 122). — ^{a}) B1 प्रादाद्यः (by transp.); D1 याः प्रादाः. K2.3.5 V1 B Da Dn D2-6.8 S कनक-; K4 D1 कांचनं. D1 स्तंभे. 125^{ab} = 12. 44. 12^{cd}. — ^{b}) Da G2 प्रसादं. — K3 om. 125^{c}–126^{b}. D2 om. from 125^{c} up to यः (in 127^{a}). — ^{c}) D1 T G2-4 पूर्ण-; D4 फुल्ल- (for पूर्णं). Da पद्मोपलाक्षीणां; T G -पद्मदलाकीर्णं. — ^{d}) B4 शयनमुत्तमं (marg. °नसंगतं).

126 D3.7 om. 126 (cf. v. l. 125, 122); K3 om. 126^{ab} (cf. v. 125). — ^{a}) Da1 S (except G2) [ऽ]भिरूपेभ्यः; Da2 [ऽ]निरू°; Dn2 [ऽ]नुरूपस्य. — ^{b}) K5 V1 B Da Dn D3-6.8 S च विविधान् (G4 च विषयान्) (for उच्चावचांस्). K2.4 V1 B Da Dn D3-6.8 S बहून् (for तथा). — ^{c}) D1 यस्य देशेन. B2 Da T1 G1.3.4 M1 यद् (for तद्). — ^{d}) K2.4 व्यभजंति.

127 D7 om. 127 (cf. v. l. 122). D2 om. up to यः (cf. v. l. 125). — ^{a}) D1.3 खनयामास. S क्रोधात् (for कोपात्). — ^{b}) K5 Da2 सागरांबरां; Da1 °रांबरं; D4 °रांतिकां; D6 °राकरां; D3 °रांकिकं (for °राङ्किताम्). — ^{c}) Da यश्च (for यस्य). K4 नामा. K4 D2 समुद्रस्य; D1 °द्रोपि. — ^{d}) B2 उपेयिवान्; D1 अवाप्तवान्; D4 उमागतः; G1 उपागतं; M2 उपागमत्.

128 D7 om. 128 (cf. v. l. 122). Ś1 K… om.

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 1030
B. 12. 29. 137
K. 12. 28. 137

[16] राजानं च पृथुं वैन्यं मृतं शुश्रुम सृञ्जय ।
यमभ्यषिञ्चन्संभूय महारण्ये महर्षयः ॥ १२९
प्रथयिष्यति वै लोकान्पृथुरित्येव शब्दितः ।
क्षताच्च नस्त्रायतीति स तस्मात्क्षत्रियः स्मृतः ॥ १३०
पृथुं वैन्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन् ।
ततो राजेति नामास्य अनुरागादजायत ॥ १३१
अकृष्टपच्या पृथिवी पुटके पुटके मधु ।
सर्वा द्रोणदुघा गावो वैन्यस्यासन्प्रशासतः ॥ १३२
अरोगाः सर्वसिद्धार्था मनुष्या अकुतोभयाः ।
यथाभिकाममवसन्क्षेत्रेषु च गृहेषु च ॥ १३३
आपः संस्तम्भिरे यस्य समुद्रस्य यियासतः ।
सरितश्चानुदीर्यन्त ध्वजसङ्गश्च नाभवत् ॥ १३४
हैरण्यांस्त्रिनलोत्सेधान्पर्वतानेकविंशतिम् ।
ब्राह्मणेभ्यो ददौ राजा योऽश्वमेधे महामखे ॥ १३५
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ १३६
किं वै तूष्णीं ध्यायसि सृञ्जय त्वं
न मे राजन्वाचमिमां शृणोषि ।

128^{bcd}; T_1 G om. 128^{bc}. T_2 partly damaged.

129 With 129–136, cf. B. 7. 69. 1–32. D_7 om. 129 (cf. v. l. 122). —^{a}) K_1 वैनं; K_3 Da $D_{2.3}$ (marg.; also as in text). $_5$ वैण्यं. —^{b}) $B_{1.3-5}$ Dn_2 S सृं(G_3 सं)जय शुश्रुम (T $G_{1.3.4}$ $M_{1.3}$ °मः). Da_2 सृंजयः; D_4 शृंजय. — B_5 repeats 129^{cd} after 130. After 129, B_5 reads (for the first time) 132^{cd}, repeating it in its proper place.

130 D_7 om. 130 (cf. v. l. 122). D_1 reads 130^{ab} twice. —^{a}) K_4 प्रथयित्वा इमान्; Dn_2 °यिष्यंति वै; D_1 (second time) बृहता कुरुते. —^{b}) Da M_2 विश्रुतः; D_1 (second time) शब्दिभिः (for शब्दितः). —^{c}) $Ś_1$ $K_{1.4}$ D_1 क्षताश्च नस्; V_1 $B_{1.3}$ Dn D_6 G_2 क्षताद्यो वै; $B_{0.4.5}$ $D_{2.3.5.8}$ क्षतान्नो वै; B_2 Da क्षतात्स नस्. B_2 D_4 T_2 $G_{1.2}$ $M_{1.3.4}$ त्रास्यतीति. —^{d}) K_5 D_4 ततोसौ; B_2 तेन वै स (hypermetric); Da तेन वै; S ततो हि (M_2 ततोत्ति-) (for स तस्मात्). — After 130, B_5 repeats 129^{cd}.

131 D_7 om. 131 (cf. v. l. 122). —^{a}) K_4 $D_{4.8}$ पृथु-. Da $D_{5.8}$ वैण्यं; D_4 -वेण्यं. G_2 प्रजां. —^{b}) K_1 रक्तः स्मेति; T G रक्षस्वेति. V_1 यदाब्रवन्. K_3 रक्ताः स्म इति चाब्रुवन्. —^{c}) Da_1 D_1 राज्येति. —^{d}) Da_2 अजातयः (for अजायत).

132 D_7 om. 132 (cf. v. l. 122). B_5 reads 132^{cd} (for the first time) after 129. 132^{a} = 12. 70. 12^{a}. —^{c}) M_2 द्रोणदुहा. —^{d}) B_5 (second time) D_8 वैण्यस्य.

133 D_7 om. 133 (cf. v. l. 122). G_3 om. (hapl.) 133^{a}–134^{b}. —^{a}) D_1 आरोगाः; D_4 अरागाः; M_2 आरोग्याः. D_1 सर्वसीतायां. —^{b}) K_1 सर्वाढ्या; Da मानुषा. B_0 त्वकुतो°; B_2 Da D_2 ह्यकुतो°. —^{c}) $Ś_1$ यथातिकामम्; K_3 D_4 यथात्म°; T $G_{1.2.4}$ तथा नि°; M यथा नि°.

134 D_7 om. 134 (cf. v. l. 122). G_3 om. 134^{ab} (cf. v. l. 133). —^{a}) Da_1 अपः. $K_{2.3.5}$ V_1 B Da Dn D_{2-5} S (G_3 om.) तस्तंभिरे; D_6 तु स्तंभिरे. $B_{1-3.5}$ Da Dn $D_{2.3.5.8}$ T $G_{1.2.4}$ चास्य; $M_{1.3.4}$ तस्य. D_8 आपस्यस्तंभिरे चास्य (sic). —^{b}) K_1 यियामतः (sic). K_{2-5} V_1 B Da Dn $D_{2-6.8}$ S (G_3 om.) समुद्रमभियास्यतः. —^{c}) K_{3-5} Dn $D_{1.4.6.8}$ चान्वदीर्यंत; B_2 चानुकी°; Da_1 चात्वकी°; Da_2 चावकी°. S शैलाश्चापाद्य($M_{1.3.4}$ °श्चैवान्व-; M_2 °श्चैवाव)दीर्यंत ($M_{1.3}$ °कीर्यंत). —^{d}) $K_{3.5}$ V_1 B D (D_7 om.) T_1 G_{2-4} ध्वजभंगश्च; G_1 ध्वजभंगाश्च; $M_{1.3}$ ध्वजसंगश्च. Da_2 नाभवतः; G_1 °वन्. $Ś_1$ $K_{1.2.4}$ ध्वजसंघो (K_1 °गो) महानभूत्.

135 D_7 om. 135 (cf. v. l. 122). —^{a}) Da हैरण्यंस्. K_1 V_1 S (G_3 before corr. as in text) त्रि($G_{1.2}$ त्रीन्)नरोत्सेधान्; $K_{3.5}$ D_4 योजनोत्सेधान्; D_1 corrupt. —^{b}) K_2 B_0 °विंशतिः; Da D_3 °विंशति; $G_{1.3.4}$ °विंशतीन्. —^{d}) K_1 योश्वमेध; Da सोश्वमेधे. T_2 महाक्रतौ.

136 D_7 om. 136 (cf. v. l. 122). T_1 G om. 136^{bc}. —^{d}) D_1 मां (for मा).

137 ^{a}) K_2 Dn वा (for वै). T_1 G राजन् (for तूष्णीं). K_4 transp. ध्यायसि and सृञ्जय. $K_{3.5}$ D_4 तिष्ठसि; V_1 B Da Dn $D_{2.3.5-8}$ S ध्यायसे. Da_2 D_7 सृंजयस. —^{b}) G वै (for मे). T_1 G तूष्णीं (for राजन्). B_3 शृणोसि; D_7 शृणुष्व. —^{c}) K_1 वै (for चेन्). K_4 मौवं. K_1 Da विप्रलंभं; K_4 °लुप्तं; K_5

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न चेन्मोघं विप्रलप्तं मयेदं
पथ्यं मुमूर्षोरिव सम्यगुक्तम् ॥ १३७
सृञ्जय उवाच ।
शृणोमि ते नारद वाचमेतां
विचित्रार्थां स्रजमिव पुण्यगन्धाम् ।
राजर्षीणां पुण्यकृतां महात्मनां
कीर्त्या युक्तां शोकनिर्णाशनार्थम् ॥ १३८
न ते मोघं विप्रलप्तं महर्षे
दृष्ट्वैव त्वां नारदाहं विशोकः ।
शुश्रूषे ते वचनं ब्रह्मवादि-
न्न ते तृप्याम्यमृतस्येव पानात् ॥ १३९
अमोघदर्शिन्मम चेत्प्रसादं
सुताघदग्धस्य विभो प्रकुर्याः ।
मृतस्य संजीवनमद्य मे स्या-
त्तव प्रसादात्सुतसंगमश्च ॥ १४०
नारद उवाच ।
यस्ते पुत्रो दयितोऽयं वियातः
स्वर्णष्ठीवी यमदात्पर्वतस्ते ।
पुनस्ते तं पुत्रमहं ददामि
हिरण्यनाभं वर्षसहस्रिणं च ॥ १४१

C. 12. 1042
B. 12. 29. 149
K. 12. 26. 149

इति श्रीमहाभारते शान्तिपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥

°लब्ध; B_1 विपुलोक्तं; $D_{6.7}$ T $G_{2.4}$ विप्रलब्धं; $G_{1.3}$ °लुब्धं (for विप्रलप्तं). $K_{2.3.5}$ Dn_1 D_6 ममेदं; Da प्रनष्टं येदं. — [d]) K_3 सुप्रयुक्तं; Dn_1 संप्रयुक्तं; Dn_2 M_4 सम्यगुप्तं; T_2 सत्यमुक्तं. — After 137, $Ś_1$ K_1 D_1 ins. (erroneously) the colophon, repeating it after st. 141.

138 D_8 om. the ref.; Da संजयः. — [a]) Da शृणोषि; G_1 °ति. $K_{3.5}$ Da Dn_1 D_8 एनां (for एतां). — [c]) B_2 पुण्यवतां. — [d]) T_2 प्रीत्या (for कीर्त्या). $Ś_1$ K_1 युक्तं; K_{2-5} V_1 $Bo_{1.3-5}$ Dn_2 $D_{2.3.5-8}$ S युक्तानां; B_2 Da युतानां; Dn_1 युतां (for युक्तां). $Ś_1$ °निर्नाशयुक्तं; K_{1-4} V_1 B_2 Dn_1 $D_{2.8}$ T_1 $G_{1.2.4}$ °निर्नाशनार्थां (K_1 °र्थंत्; V_1 B_2 D_2 G_4 °र्थं); K_5 Bo D_6 °विनाशनार्थं; B_1 Dn_2 D_4 T_2 G_3 °निर्णाशनार्थां; Da °विनोदनार्थं; D_1 °निर्नाशहेतुं; $M_{1.3}$ °दीर्णाशनार्थं; M_2 °विनाशनार्थां; M_4 °निर्नशनार्थं (for °निर्णाशनार्थम्).

139 [a]) G_2 तन्मे; M_1 न तो. K_4 विप्रलुप्तं; K_5 Da D_8 विप्रलंभं; B_1 विपुलं तपो; $D_{6.7}$ T G विप्रलब्धं (G_1 °लुब्धं). G_1 महर्षेर्. — [b]) K_3 V_1 B Dn $D_{2.3.5.6.8}$ [अ]हं; K_4 Da_2 तां (for त्वां). $K_{1.3}$ V_1 B Dn $D_{2.3.5.6.8}$ नारद त्वां विशोकः; K_1 (marg.) नारदस्तं वि°; Da °दोहं वि°; T G नारद (G_1 °दा)-वीतशोकः. D_7 दृष्ट्वैषस्त्वा नानरवीतशोकं (sic). — [c]) K_5 शुश्रूषवे; $D_{1.7}$ °षते. D_1 वचनी. Bo_4 सत्यवादिन्; D_1 M_1 ब्रह्मवादी. — [d]) Da_1 तृप्याम् (for तृप्यामि).

140 [a]) D_1 corrupt; D_7 °दर्शी; D_1 °दर्शं (for °दर्शिन्). D_1 प्रसादे; T_2 प्रसन्न (for प्रसादं). — [b]) K_1 $B_{4.5}$ Da_1 सुताप-; $K_{2.3.5}$ V_1 Bo_{-3} Dn $D_{2-6.8}$ G_2 संताप-; B_4 (marg.) Da_2 D_7 T $G_{3.4}$ $M_{2.4}$ सुताय; G_1 सुदाय-; $M_{1.3}$ पुत्राधि- (for सुताघ-). T_2 देह्यस्य (for -दग्धस्य). Bo_4 प्रभो; Dn_2 $D_{4.7}$ T_1 $G_{1.3.4}$ $M_{1.3}$ विभोः. D_7 प्रतप्य; T_2 प्रकुर्यात्. — [c]) All MSS. (except $Ś_1$ K_1 D_1) सुतस्य (for मृतस्य). — [d]) B_1 °संगमं च; D_7 T G -संगमाप्नुयां (T_2 $G_{1.2}$ °यात्).

141 D_8 G_3 om. the ref. — [a]) K_3 $D_{4.7}$ S श- (T_2 न)यितोयं; K_5 ग्रसितोयं; V_1 B Da Dn $D_{2.6}$ गमितोयं (B_2 °तो वै); D_1 नयतोयं; D_3 [ऽ]यं गमितो. K_1 विषात; $K_{2.3}$ M_2 विवातः; $K_{4.5}$ B Da Dn $D_{2.5.8}$ विजातः (B_1 विजज्ञे); V_1 विजाते; D_7 विशातः; T_1 G विशोकः; T_2 विशांतः (for वियातः). $D_{3.6}$ यस्ते (D_6 यस्य) पुत्रोयं गमितो यो विजातः. — [b]) B_2 स्वंतु- (sic); D_1 सवर्ण- (for स्वर्ण). $Ś_1$ $K_{1.4}$ D_1 च (for ते). — [c]) $Ś_1$ K_1 पुत्रं (for पुनस्). $K_{2.4}$ Dn $D_{2.8}$ तु ते; K_3 तेन्यं; K_5 B_5 Da_1 तेडं; B_2 Da_2 D_7 S तं ते (G_3 ततो); D_4 तेऽयं (for ते तं). V_1 $Bo_{2.3}$ Da_1 $D_{2.3.5.6}$ T_1 G_4 M ददानि (M_2 °सि); B_4 damaged; Da_2 ददाति. D_1 पुत्र ते पुत्रहं ददासि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

३०

C. 12. 1043
B 12. 30. 1
K. 12. 29. 1

युधिष्ठिर उवाच ।

स कथं काञ्चनष्ठीवी सृञ्जयस्य सुतोऽभवत् ।
पर्वतेन किमर्थं च दत्तः केन ममार च ॥ १
यदा वर्षसहस्रायुस्तदा भवति मानवः ।
कथमप्राप्तकौमारः सृञ्जयस्य सुतो मृतः ॥ २
उताहो नाममात्रं वै सुवर्णष्ठीविनोऽभवत् ।
तथ्यं वा काञ्चनष्ठीवीत्येतदिच्छामि वेदितुम् ॥ ३

वासुदेव उवाच ।

अत्र ते कथयिष्यामि यथा वृत्तं जनेश्वर ।
नारदः पर्वतश्चैव प्राग्गृषी लोकपूजितौ ॥ ४
मातुलो भागिनेयश्च देवलोकादिहागतौ ।
विहर्तुकामौ संप्रीत्या मानुष्येषु पुरा प्रभू ॥ ५
हविःपवित्रभोज्येन देवभोज्येन चैव ह ।
नारदो मातुलश्चैव भागिनेयश्च पर्वतः ॥ ६
तावुभौ तपसोपेतावनवनीतलचारिणौ ।
भुञ्जानौ मानुषान्भोगान्यथावत्पर्यधावताम् ॥ ७
प्रीतिमन्तौ मुदा युक्तौ समयं तत्र चक्रतुः ।
यो भवेद्धृदि संकल्पः शुभो वा यदि वाशुभः ।

(sic). —[d]) Dn2 D2. 3. 5. 6. 8 हिरण्यगर्भ॰. K3 पुत्र॰; D4 पुत्रं (for वर्ष॰). D7 ॰सहस्राणि च.

Colophon om. in V1. —*Sub-parvan:* N (except D8) T G1. 2 M राजधर्म. —*Adhy. name:* K2. 4 संजयोपाख्यानं; K3 D4 षोडशराजक; Bo. 2–5 Da Dn1 D6 T1 G2–4 षोडशराजकोपाख्यानं; Dn2 षोडशराजकीयोपाख्यानं; D2. 3. 5 G1 M2 षोडशराजोपाख्यानं. —*Adhy. no.* (figures, words or both): K5 B1. 4 Da1 Dn D7 S 29 (as in text); D8 28.

30

1 D8 om. the ref. —[b]) M [आ]त्मजो (for सुतो). —[c]) D1 पंचं (sic) (for पर्व°). K2 Dn1 D2 वा; T2 तु (for च). —[d]) D7 G3 दत्तं (for दत्तः). V1 B D (except D1. 4. 7) तेन; G3 एको (for केन). Bo ममाचर (for ममार च).

2 [a]) G यतो (for यदा). —[c]) Da अप्राप्य (for °प्त॰). —[d]) Da2 संजयस्य.

3 [a]) K5 D4 ॰मात्रं तु; V1 B1. 4 वै मात्रं; Da D7 ॰मात्रं तत्; S ॰मात्रं च. —[b]) Dn2 सुवर्णष्ठीविणो; G1 °तो; M1. 3 °ता. T2 G3 भवेत् (for ऽभवत्). —[c]) K3 D4 सत्यं; K5 V1 B2. 3 (marg. as in text). 5 Dn D2. 3. 5–8 कथं (for तथ्यं). D8 कांचनं पृथ्वी. —[d]) Dn2 ह्येतद्; T1 G एतद् (for [इ]त्येतद्). D1 वेदितं.

4 D8 om. the ref.; K2 श्रीवासुदेवः; K5 D3. 5 श्रीकृष्णः; V1 श्रीकृष्ण उवाच; D7 श्रीव्यासः; T G श्रीभगवान् (for वासुदेव उवाच). —[a]) K3 V1 B Da D2–8 S (except G2) वर्तयिष्यामि; K5 Dn वर्ण° (for कथ°). —[b]) K3. 5 Bo. 4. 5 D4. 6. 7 T G नरेश्वर; B2 Da महीपते (for जनेश्वर). —[d]) K2–5 V1 B Da Dn D3–7 S द्वावृषी; D2. 8 महर्षी (for प्राग्गृषी). K4 देव॰ (for लोक॰). V1 B Da Dn2 D2. 3. 5. 6. 3 ॰संम(D6 °मि)तौ; Dn1 ॰सत्तमौ; D7 S ॰विश्रुतौ (for ॰पूजितौ).

5 [a]) Da1 भागिनेयस्य; D1 भागिनीयश्च. —[c]) K1 विहंतुकामौ. D6 सुप्रीत्या. —[d]) K V1 B Da Dn D1–6. 8 T2 G2 M मानुषेषु; D7 T1 G1. 3. 4 मनुष्येषु. G1 पुनः (for पुरा). K1 D1 प्रभु; K3 T2 प्रभो; V1 B Da Dn D2. 3. 5. 6. 8 विभो; D7 G1 प्रभुः (for प्रभू).

6 [a]) M4 ॰पवित्रेणाज्येन. —[b]) D8 lacuna (for देवभोज्येन). T1 G3. 4 दैव॰ (for देव॰). Da ॰लोकेन (for ॰भोज्येन). Ś1 K1–4 Dn D1 T G हि (for ह). —[cd]) D1–3. 5. 8 मातुलो नारदः (by transp.). K3. 5 V1 B (B4 damaged) Da D3. 4. 6–8 T1 G M तत्र (for चैव). Bo. 1. 3. 5 D6. 7 T1 G M2. 4 तु (for the second च). T2 मातुलो भागिनेयश्च नारदः पर्वतस्तथा.

7 [a]) K4 तापसौपेतो (sic). —[b]) K1 धरनी॰ (for अवनी॰). —[c]) Ś1 मानुष्यान्. M4 भोग्यान् (for भोगान्). —[d]) D4 पर्यधावंती (sic).

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation

अन्योन्यस्य स आख्येयो मृषा शापोऽन्यथा भवेत् ८
तौ तथेति प्रतिज्ञाय महर्षी लोकपूजितौ ।
सृञ्जयं श्वैत्यमभ्येत्य राजानमिदमूचतुः ॥ ९
आवां भवति वत्स्यावः कंचित्कालं हिताय ते ।
यथावत्पृथिवीपाल आवयोः प्रगुणीभव ।
तथेति कृत्वा तौ राजा सत्कृत्योपचचार ह ॥ १०
ततः कदाचित्तौ राजा महात्मानौ तथागतौ ।
अब्रवीत्परमप्रीतः सुतेयं वरवर्णिनी ॥ ११
एकैव मम कन्यैषा युवां परिचरिष्यति ।
दर्शनीयानवद्याङ्गी शीलवृत्तसमन्विता ।
सुकुमारी कुमारी च पद्मकिञ्जल्कसंनिभा ॥ १२
परमं सौम्य इत्युक्तस्ताभ्यां राजा शशास ताम् ।
कन्ये विप्रावुपचर देववत्पितृवच्च ह ॥ १३
सा तु कन्या तथेत्युक्त्वा पितरं धर्मचारिणी ।
यथानिदेशं राज्ञस्तौ सत्कृत्योपचचार ह ॥ १४
तस्यास्तथोपचारेण रूपेणाप्रतिमेन च ।
नारदं हृच्छयस्तूर्णं सहसैवान्वपद्यत ॥ १५
ववृधे च ततस्तस्य हृदि कामो महात्मनः । C. 12. 1059 B. 12. 30. 17 K. 12. 29. 17

---

8 ^{a}) Da प्रीतियुक्तौ; Dn2 D4 °मंतो (for °मन्तौ). — ^{b}) K3.5 V1 B Dn D2-8 S चैव (B2 चापि) (for तत्र). — $8^{cd}=19^{cd}$. — ^{c}) B5 Dn1 वृद्धि- (for हृदि). — ^{d}) G1 [अ]शुभं. — D7 om. (hapl.) 8^{e}–19^{d}. — ^{e}) B1 Dn च (for स). — ^{f}) K4 नृप (for मृषा).

9 D7 om. 9 (cf. v. l. 8). — ^{b}) S देवर्षी (for महर्षी). D2.3.5.8 -संमतौ (for -पूजितौ). — ^{c}) Ś1 (marg.) Da शैब्यम्; K2.4 B1-3 Dn D2.3.5.6.8 M4 चैत्यम् (for श्वैत्यम्). M1.8 अध्येत्य (for अभ्येत्य). K3.5 D4 त(D4 य)दा सृंजयमभ्येत्य; V1 सृंजयं तौ समभ्येत्य.

10 D7 om. 10 (cf. v. l. 8). — ^{a}) Ś1 (m as in text) K1 D1 आवां भुवि निवत्स्यामः. — ^{b}) V1 D1.4 G1 किंचित्-. G1 (before corr.) विधाय (for हिताय). — ^{d}) B2 आवयोः प्रदिशाश्रयं. Ca प्रगुणीभव (as in text). — ^{e}) B2 Da [इ]त्युक्त्वा तु (Da च) (for [इ]ति कृत्वा). V1 B1.3 Dn D2.3.5.6.8 राजा तौ (by transp.).

11 D7 om. 11 (cf. v. l. 8). — ^{a}) B2 Da कदाचित्तौ मुनी राजा. — ^{b}) B2 Da सुखासीनौ (for महात्मानौ). K2.4 सभागतौ; V1 Bo.1.3.5 Dn D2.3.5.6.8 तपोधनौ; B4 तपस्विनौ (for तथागतौ). — ^{d}) Ś1 K1 सुतेति (for सुतेयं). S देवरूपिणी (for वरवर्णिनी).

12 D7 om. 12 (cf. v. l. 8). — ^{a}) Ś1 K1 Bo D1 एकैकं (for एकैव). K4 कल्पैषा (for कन्यैषा). — ^{d}) B4 damaged. Da शीले (for शील-). Bo.3 -वृत्ति- (for -वृत्त-). K2.4 -समायुता; K3.5 V1 B (B4 damaged) Da Dn D2-6.8 -समाहिता (for -समन्विता). — ^{e}) K5 D4 कुमारी सुकुमारी (by transp.). ❀ Ca: सुकुमारीति नाम्ना । ❀ — ^{f}) K2-5 V1 B1 Dn M1.3.4 -सुप्रभा; Da D2-6.8 M2 -सप्रभा (for -संनिभा).

13 D7 om. 13 (cf. v. l. 8). — ^{a}) K5 परमो. K V1 Bo.1.3-5 D (D7 om.) G2 सौम्यम्. K2-5 Dn D8 G2 इत्युक्तं (K4 °क्त; G2 °क्त्वा). B3 इत्युक्त्वा तौ सुतामाह; T G1.3.4 परं सौम्येयमित्युक्त्वा. — ^{b}) K1 शशीसमः (for शशास ताम्). Ś1 सः (for ताम्). B2 सुकुमारीं महीपतिः. — ^{c}) V1 Bo.3.4 कन्यां; B1 Da कन्या (sic). D1.2 विप्राम् (for विप्राव्). K4 परिचर; Bo.4 Da उपचरेद् (Da °रे) (for °चर). B2 उपचर्याविमौ भद्रे. — ^{d}) Ś1 K1.4 D1 देवर्षी (for देववत्). D2.3.5 पितृवद्देववत् (by transp.). G3 प्रियवत् (for पितृ°). K2.4 स्वमू; B2 उभौ (for च ह). — After 13, Da (erroneously) repeats portions of B2 variants for 13^{a}, 13^{c} with 12^{e}, 13^{d} to make up a stanza, mostly repetitions.

14 D7 om. 14 (cf. v. l. 8). — ^{a}) K5 D1 च (for तु). Bo कन्या च. D2.3.5.8 कन्या तु (by transp.). K1 तयोत्युक्तः (sic) (for तथेत्युक्त्वा). — ^{b}) K5 B5 (m as in text) धर्मचारिणी; B4 कर्मचारिणी (for धर्म°). — ^{c}) G1.2 यथानिदेशे. — ^{d}) K1 संस्कृत्य (for सत्कृत्य). B2 सा (for ह). K4 सत्याद्उपचचार ह; Da1 मुनिपरीच° (sic); Da2 मुनि**चचार सा.

15 D7 om. 15 (cf. v. l. 8). — ^{a}) K2.3.5 V1 Bo.1.3-5 Dn D2.3.5.6.8 S तेन (for तथा). B2 Da भक्त्यो(B2 °क्त्या)पहारसंलापै. — ^{c}) K1 नारदे. Da हृच्छयात्; T1 G1.3.4 प्रश्रयस् (for हृच्छ°). — ^{d}) K1 [अ]न्व(marg. °नु)पद्यत; K3 Dn1 T2 [अ]भ्य°; B2 damaged.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

C. 12. 1060
B. 12. 30. 18
K. 12. 29. 17

यथा शुक्लस्य पक्षस्य प्रवृत्तावुडुराट्छनैः ॥ १६
न च तं भागिनेयाय पर्वताय महात्मने ।
शशंस मन्मथं तीव्रं व्रीडमानः स धर्मवित् ॥ १७
तपसा चेङ्गितेनाथ पर्वतोऽथ बुबोध तत् ।
कामार्तं नारदं क्रुद्धः शशापैनं ततो भृशम् ॥ १८
कृत्वा समयमव्यग्रो भवान्वै सहितो मया ।
यो भवेद्धृदि संकल्पः शुभो वा यदि वाशुभः ॥ १९
अन्योन्यस्य स आख्येय इति तद्वै मृषा कृतम् ।
भवता वचनं ब्रह्मंस्तस्मादेतद्वदाम्यहम् ॥ २०
न हि कामं प्रवर्तन्तं भवानाचष्ट मे पुरा ।
सुकुमार्यां कुमार्यां ते तस्मादेष शपाम्यहम् ॥ २१
ब्रह्मवादी गुरुर्यस्मात्तपस्वी ब्राह्मणश्च सन् ।
अकार्षीः समयभ्रंशमावाभ्यां यः कृतो मिथः ॥ २२
शप्स्ये तस्मात्सुसंक्रुद्धो भवन्तं तं निबोध मे ।
सुकुमारी च ते भार्या भविष्यति न संशयः ॥ २३
वानरं चैव कन्या त्वां विवाहात्प्रभृति प्रभो ।

16 D7 om. 16 (cf. v. l. 8). — a) Da1 विवृद्धे (for ववृधे). K2.3.5 V1 B Da Dn D2–3.8 S हि (for च). D6 मनस्; T G सदा; M1.3 तथा; M2.4 तदा (for ततस्). — c) B1 Da1 शुक्रस्य (for शुक्लस्य). — d) K3 प्रवृद्धान्; K4 D1 °त्तान्; K5 D4 °द्धाव्; V1 प्रवृद्धश्. K1 उत्तराः (sic); V1 B Dn D2.3.5.6.8 चंद्रमाः (for उडुराड्).

17 D7 om. 17 (cf. v. l. 8). — a) T G M2 तद् (for तं). — c) G1 शशंसीं (sic) (for शशंस). K3 मनघं; Dn हृच्छयं; G1 मथयंस् (for मन्मथं). — d) S व्रीळमानः (for व्रीड°).

18 D7 om. 18 (cf. v. l. 8). — a) B2 Da तपोभिर् (for तपसा). K2 G1 वा; B2 Da lacuna (for च). K3.5 V1 B D (except D1; D7 om.) G2 M इंगितैश्चैव; T G1.3.4 इंगितं चैव. — b) K1.3.5 B D (D7 om.) तं; T G ह (for तत्). — c) K1 कामांधं. K4 दृष्ट्वा; Da शुद्धः (for क्रुद्धः). — d) B1 तपो; Da तदा; S अथो (M2 अतो) (for ततो). K3 नृपः; D4 नृप (for भृशम्).

19 D7 om. 19 (cf. v. l. 8). — a) K1 छित्वा (sic) (for कृत्वा). V1 Da अव्यग्रं; B1 अव्यग्र. — $19^{cd} = 8^{cd}$. — c) B1 बुद्धि°; B4 damaged (for हृदि).

20 a) = 8c. D4 अन्योन्यतः. Dn2 च; D7 सम्°; T1 G1.3.4 तद् (for स). T1 G आख्येयम्. — b) D1 तं (for तद्). T2 वा (for वै). D8 मृषायतं (for मृषा कृतम्). G1 कृतिं (for कृतम्). — c) D1 M1.4 (*inf. lin.*) भवतां; G1.2 °तो; M4 महतां (for भवता). Da ब्रह्म (for ब्रह्मंस्). — d) K1 एत; K3 V1 Bo.2–5 Dn S एष; K5 B1 D2.6.7 एत्र; Da एवं; D4 एप (sic) (for एतद्). K1.3.5 D4.7 T G व्रजामि; V1 B Da Dn D2.3.5.6.8 शपामि; M ब्रवीमि (for वदामि).

21 Ś1 K1 om. (hapl.) 21. — a) K3 D4 प्रवर्द्धं(D4 °द्धं)तं; K4 प्रवृत्तातं; K5 प्रवर्धेतं; B4 T1 G2–4 M1.3 प्रवृत्तं तं; B5 (marg.) प्रवृत्तं तु; D1 प्रवर्तते; M2 प्रवृद्धं तं. — b) K3.5 D4 प्रभो (for पुरा). — c) D7 कुमारांस् (for °र्यां). K2.4 Da D2.3.5.8 च; K5 D4 यस्; Bo.3–5 D1 हि; B2 यत् (for ते). — d) K4.5 V1 B Da D1–6.8 G2 M तस्मान् (B2 तेन; Da यत्ते) नैतत्; D7 T G1.3.4 तस्मान्नैष (for °देष). K4.5 V1 B D (except Dn) S क्ष(D4 क्र)मामि (for शपामि).

22 a) K2 V1 B D (except D1.4) S (except M1.3) -चारी; K4 -चार्ये (for -वादी). — b) K1 (marg.) G1 ब्रह्मणश्. V1 सः; D1 यत् (for सन्). B4 (marg.) Dn2 D2.3.5.6.8 तपस्वी नियतव्रतः. — c) V1 Da Dn1 D8 अकार्षीत्. D2.3.5.7.8 नियम- (for समय-). — d) B2 यत्कृतं (for यः कृतो).

23 a) B4 damaged. K4 तु (for सु-). D7 T1 G M तस्माच्छ(G1 °त्त)प्स्यामि संक्रुद्धो; T2 तच्छप्स्यामि च सं°. — b) Da1 भवितं तं; D7 भगवंतं (for भवन्तं तं). V1 तन् (for तं). — c) D7 T G1.3.4 तु ते; G2 M1–3 कृते (for च ते). — d) D7 भवतीयं; T G भवितेयं (for भविष्यति). M2 दिव्यरूपा भविष्यति.

24 a) D7 S वानरत्वं च (for °रं चैव). K5 B3.4 Bo त्वां (marg.) Dn ते रूपं; V1 B2 Da रूपं ते; B4 कन्या (by transp.); B1 D2.3.5.6–8 S ते कन्या; B5 तां कन्या (sic). — b) G3 विरहात् त्वां रूपं; (for विवा°). — c) K4 V1 Bo.3–5 D3 संद्रक्ष्यंते; B1 संद्रुह्यंति; D1 संद्रक्ष्यति; D2 संरक्षते; D5.6.8

संद्रक्ष्यन्ति नराश्चान्ये स्वरूपेण विनाकृतम् ॥ २४
स तद्वाक्यं तु विज्ञाय नारदः पर्वतात्तदा ।
अशपत्तमपि क्रोधाद्भागिनेयं स मातुलः ॥ २५
तपसा ब्रह्मचर्येण सत्येन च दमेन च ।
युक्तोऽपि धर्मनित्यश्च न स्वर्गवासमाप्स्यसि ॥ २६
तौ तु शप्त्वा भृशं क्रुद्धौ परस्परममर्षणौ ।
प्रतिजग्मतुरन्योन्यं क्रुद्धाविव गजोत्तमौ ॥ २७
पर्वतः पृथिवीं कृत्स्नां विचचार महामुनिः ।
पूज्यमानो यथान्यायं तेजसा स्वेन भारत ॥ २८
अथ तामलभत्कन्यां नारदः सृञ्जयात्मजाम् ।
धर्मेण धर्मप्रवरः सुकुमारीमनिन्दिताम् ॥ २९
सा तु कन्या यथाशापं नारदं तं ददर्श ह ।
पाणिग्रहणमन्त्राणां प्रयोगादेव वानरम् ॥ ३०
सुकुमारी च देवर्षिं वानरप्रतिमाननम् ।
नैवावमन्यत तदा प्रीतिमत्येव चाभवत् ॥ ३१
उपतस्थे च भर्तारं न चान्यं मनसाप्यगात् ।
देवं मुनिं वा यक्षं वा पतित्वे पतिवत्सला ॥ ३२
ततः कदाचिद्भगवान्पर्वतोऽनुससार ह ।
वनं विरहितं किंचित्तत्रापश्यत्स नारदम् ॥ ३३
ततोऽभिवाद्य प्रोवाच नारदं पर्वतस्तदा । C. 12. 1077 B. 12. 30. 35 K. 12. 29. 36

संद्रक्ष्यते (for °क्ष्यन्ति). D$_1$ नराच् (for नराश्). B$_2$ Da D$_7$ S द्रक्ष्यंते (G$_2$ °क्ष्यंति; M$_{1.3}$ °क्ष्यते) मानवाश्चान्ये. — d) Bo.$_{2-5}$ D$_{2.3.5.8}$ M [अ]विनाकृतं; Dn विनाशनं (for विनाकृतम्).

25 a) D$_6$ एतद्; T$_2$ तत्तद् (for स तद्). V$_1$ च शापं (for तद्वाक्यं). Da [अ]वज्ञाय (for विज्ञाय). — b) K$_2$ नारदात्. D$_7$ S पर्वतं (M$_1$ °तान्) नारदस्. K$_{3.4}$ पर्वतस्; V$_1$ B Da Dn D$_{2.3.5.6.8}$ पर्वतं (for °तात्). Ś$_1$ V$_1$ B$_1$ Dn$_1$ D$_{1.7}$ T$_2$ G$_2$ M$_{1.3}$ तथा (for तदा). — c) B$_2$ Da D$_7$ S शशाप (for अशपत्). B$_2$ समभि-; Da श(Da$_2$ स)मति-; Dn$_2$ D$_7$ T G तमभि- (for तमपि). Dn$_2$ D$_7$ T G$_{1.3.4}$ -क्रुद्धो (for क्रोधाद्). D$_6$ आशपं तमपि क्रोधात्. — d) D$_6$ च मातुलः; D$_7$ स मातुलं; D$_8$ G$_1$ समाकुलः.

26 b) B$_4$ damaged. Ś$_1$ K$_1$ धनेन (for दमेन). — c) M$_{1.3}$ हि (for ऽपि). K$_3$ D$_4$ ब्रह्मनित्यश्; K$_4$ धर्मनिष्ठश्; B$_4$ Dn नित्यधर्मश्; D$_1$ धर्ममित्यश्; T$_2$ धर्मयुक्तश् (for °नित्यश्). G$_3$ युक्तोपि धर्मं निश्चित्य. — d) K$_{4.5}$ D$_{1.4}$ स्वर्गं (for स्वर्ग-). K$_5$ D$_4$ एष्यति (for आप्स्यसि). K$_{2.3}$ V$_1$ Bo.$_{1.3-5}$ Dn D$_{2.3.5.6.8}$ न वै स्वर्गमवाप्स्यसि; B$_2$ Da स्वर्गं नावाप्स्यते भवान्; D$_7$ T$_1$ G M स्वर्गं नो (M ना-) वासमाप्स्यसि; T$_2$ स्वर्गे वासं न चा°.

27 a) K$_{1.4}$ Dn$_2$ D$_1$ भृशं क्रुद्धो; Bo.$_3$m.$_{4.5}$ D$_{2.3.5.6.8}$ सुसंक्रुद्धो; B$_3$ तथान्योन्यं; T$_2$ परं क्रुद्धौ. M$_{2.4}$ तौ शप्त्वा भृशसंक्रुद्धौ. — b) K$_1$ (before corr. as in text) V$_1$ B$_2$ S अमर्षिणौ; Bo.$_3$m.$_{4.5}$ D$_{2.3.5.8}$ अमर्षितौ. B$_3$ अज्ञातपरमार्थिनौ. — G$_2$ om. 27^{cd}. — d) B$_4$ मत्ताव् (for क्रुद्धाव्). M$_2$ महागजौ (for गजोत्तमौ).

28 b) K$_3$ V$_1$ Bo.$_{1.3-5}$ Dn D$_{2.3.5.6.8}$ -मतिः (for -मुनिः). — c) Ś$_1$ D$_1$ -न्याय्यं (for -न्यायं).

29 b) K$_3$ D$_{1.4}$ सृंजयाच्छुभां (D$_1$ °त्सुतां). — V$_1$ reads 29^{cd} on marg. — c) K$_{2.3.5}$ V$_1$ B D (except D$_1$) S विप्र- (for धर्म-).

30 a) Da$_1$ -न्यायं (for -शापं). — b) Da वानरं (for नारदं). — d) K$_5$ V$_1$ B Dn D$_{2.3.5.6.8}$ नियोगाद् (for प्र°). V$_1$ Bo.$_{3-5}$ Dn D$_{2.3.5.6.8}$ नारदं (for वानरम्).

31 a) B$_2$ Da D$_7$ S तु (for च). — b) Da °प्रतिमानिनी (Da$_2$ °ननि). — c) K$_4$ मैव (for नैव). Da D$_1$ [अ]वामन्यत; M$_{1.3}$ [अ]वमन्येत. — d) D$_1$ [अ]भवेत्.

32 a) K$_{3-5}$ D$_4$ सुकुमारी (for उपतस्थे). — b) D$_7$ T$_1$ G$_{1.3.4}$ M$_{1.3.4}$ [अ]गमत् (for [अ]प्यगात्). — c) Ś$_1$ K$_{1.4}$ D$_1$ च (for the first वा).

33 a) Ś$_1$ K$_1$ तदा (for ततः). — G$_2$ om. 33^{b}–34^{a}. — b) V$_1$ B (B$_4$ damaged) D (except D$_{1.4}$) S (G$_2$ om.) [ऽ]नुचचार (for ऽनुससार). — c) K$_{2.4}$ वने (for वनं). D$_8$ M$_{1.3}$ विरचितं; Ca °हितं (as in text). Ś$_1$ K$_{1.4}$ कश्चित् (for किंचित्). — d) Ś$_1$ नारद (sic); G$_1$ नारदः.

34 G$_2$ om. 34^{a} (cf. v. l. 33). — b) Da D$_4$ M$_{1.3.4}$ मातुलं (for नारदं). D$_7$ T$_1$ G पर्वतो नारदं

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 1078 B. 12. 30. 36 K. 12. 29. 35 भवान्प्रसादं कुरुतां स्वर्गादेशाय मे प्रभो ॥ ३४
तमुवाच ततो दृष्ट्वा पर्वतं नारदस्तदा ।
कृताञ्जलिमुपासीनं दीनं दीनतरः स्वयम् ॥ ३५
त्वयाहं प्रथमं शप्तो वानरस्त्वं भविष्यसि ।
इत्युक्तेन मया पश्चाच्छप्तस्त्वमपि मत्सरात् ।
अद्यप्रभृति वै वासं स्वर्गे नावाप्स्यसीति ह ॥ ३६
तव नैतद्धि सदृशं पुत्रस्थाने हि मे भवान् ।
निवर्तयेतां तौ शापमन्योऽन्येन तदा मुनी ॥ ३७
श्रीसमृद्धं तदा दृष्ट्वा नारदं देवरूपिणम् ।
सुकुमारी प्रदुद्राव परपत्यभिशङ्कया ॥ ३८
तां पर्वतस्ततो दृष्ट्वा प्रद्रवन्तीमनिन्दिताम् ।
अब्रवीत्तव भर्तैष नात्र कार्या विचारणा ॥ ३९
ऋषिः परमधर्मात्मा नारदो भगवान्प्रभुः ।
तवैवाभेद्यहृदयो मा ते भूदत्र संशयः ॥ ४०
सानुनीता बहुविधं पर्वतेन महात्मना ।
शापदोषं च तं भर्तुः श्रुत्वा स्वां प्रकृतिं गता ।

(by transp.). Ś1 K1.4 D7 तथा (for तदा). T2 पर्वतो मातुलं तदा. — (c) V1 भगवन् (hypermetric) (for भवान्). V1 Dn कुरुतात् (for °तां). — (d) Bo.1.5 Da स्वर्गदेशाय; D7 S स्वर्गावासाय.

35 (b) K4 Bo D7 T G M1–3 नारदः पर्वतं (by transp.). K1–4 Dn D7 T2 तथा (for तदा). — (d) Ś1 K1 G2 M2 दीनदीनतरः (Ś1 °रं); Dn2 T1 G1 दीनं दीनतर-; D7 दीनं दीनतरं. T1 -स्वरं (for स्वयम्).

36 (a) D7 त्वयाहं पुरतश्चैव. — (b) T2 G1 वानरत्वं (for °स्त्वं). Da भविष्यति; D1 भवेरिति (for भविष्यसि). — (c) D7 T G इत्युक्ते च; M4 °क्त्वैनं (for °क्तेन). D7 यथा (for मया). — (d) Ś1 K1.4 अति-; Bo D8 असि (for अपि). — (e) T1 G नो (sic) (for वै). — (f) D6 स्वर्गं (for स्वर्गे). V1 B2 D8 M1 नावाप्स्यतीति; Da नायाप्स्यसीति; D1 नैवा°. K4 Dn2 D2 [इ]ह; B2.3 Da वै; D6 च (for ह). Ś1 K1 वा (for न).

37 (a) B2 न तु वा; Da न तव (for तव न). K2.3.5 Dn2 D2.4.6.8 विसदृशं (for हि स°). — (b) D1 पुत्रस्थानं; T2 G1 M1.3.4 °स्थानो; Ca °स्थाने (as in text). D6 [ऽ]भवत् (for भवान्). — Before 37c, T2 ins. श्रीकृष्णः. — (c) Bo.6 Da D1.7 T G1.3.4 न्यवर्त° (for निवर्त°). K2.3.5 V1 B Dn D2.3.5.6.8 शापाद्; Da पापम् (for शापम्). — (d) K4 D1.7 T G M1.3 अन्योन्यस्य. B2 Da T2 महा-; D2.3.6.8 ततो (for तदा). V1 [आ]त्मना; Da G1 मुनिः; D7 त्वमः (sic) (for मुनी).

38 (a) B2 असमृद्धं; G1 श्रीसमूद्धं (sic). K5 B2 Da D2.3–5.8 T2 ततो (for तदा). — (b) D2.3.5.8 -दर्शनं (for -रूपिणम्). — (c) D4 सुकुमारा. K1 तु दुद्राव; T1 G2–4 न संप्राप (for प्रदुद्राव). — (d) K1.4 Da पर इत्यभिशंकया; D7 S परपुंसि वि(D7 M1.3 °स-वि-; T2 G1 °सीव)शंकया.

39 (a) K1 om. from 39a up to सुतं (in 12. 31. 30a). D1 पर्वतौ सतो (for °तस्ततो). — (b) V1 Dn2 D4 T1 G [अ]पाद्रवन्तीम्; B2 द्रवमानाम्; Ca प्र° (as in text). V1 अनंदिताम्; D1 अनिर्दितां. — (c) B4 damaged. D7 कर्तैव; D8 भर्तायं; T2 भर्तेति (for भर्तैष).

40 K1 om. 40 (cf. v. l. 39). — (a) D7 S -धर्मज्ञो (for -धर्मात्मा). D4 ऋषिः स (hypermetric) (for ऋषिः). — (b) B1 ऋषिः; G2 प्रभुं (for प्रभुः). — (c) Ś1 K3.4 D4 तथैव (for तवैव). K4 भीरुहृदयो; D7 चोद्य°; T2 चार्य°; M1.3.4 [अ]वेद्य° (for [अ]-भेद्य°). — (d) B2 Da1 भवत्वत्र; Da2 भवत्यत्र (for ते भूदत्र). D7 S मा भूत्ते संशयोत्र वै (M2 तु).

41 K1 om. 41 (cf. v. l. 39). — (a) B1 D1 सुनीता (for [अ]नुनीता). — (c) D1 -तोपं (sic) (for -दोषं). D4 M2 तद्; M1 ते (for तं). T2 भर्तुश्च (for तं भर्तुः). — (d) B2 Da D7 T G M3.4 सा; D1.2 सां (for स्वां). Ś1 गतः; Bo Da2 D8 गताः (for गता). K2.3.5 Dn2 D4 श्रुत्वा प्रकृतिमागता. — (e) B4 damaged. B2 Da [ऽ]पि; D8 प्र- (for ऽथ). — (f) K3.5 B B2 Da गतः; D7 यथा (for ययौ). K3.5 B Dn1 D3.5 [ऽ]भि-; Da Dn2 D2.4.6.7 T1 G M4 [ऽ]पि; D8 [ऽ]भ्या-; M1.3 वि-; M2 तु (for ऽथ). K3.5 B D (except D1) T1 G M [अ]गमद् (for ययौ). K2.4 D1 गृहं. T2 प्रकृतिं नारदोगमत्.

42 K1 om. 42 (cf. v. l. 39). Before 42, K2 V1 B1.2 Da Dn D6 G1 ins. वासुदेव उ°; K4.5 Bo. 3–5 D2.3.5 कृष्ण उ°; D1 श्रीभगवानु°. — (a) K5 V1 B D (except D1.4.7) M -कर्ता (for -कर्मा). D3

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पर्वतोऽथ ययौ स्वर्गं नारदोऽथ ययौ गृहान् ॥ ४१
प्रत्यक्षकर्मा सर्वस्य नारदोऽयं महानृषिः ।
एष वक्ष्यति वै पृष्टो यथा वृत्तं नरोत्तम ॥ ४२

इति श्रीमहाभारते शान्तिपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

३१

वैशंपायन उवाच ।
ततो राजा पाण्डुसुतो नारदं प्रत्यभाषत ।
भगवञ्श्रोतुमिच्छामि सुवर्णष्ठीविसंभवम् ॥ १
एवमुक्तः स च मुनिर्धर्मराजेन नारदः ।
आचचक्षे यथा वृत्तं सुवर्णष्ठीविनं प्रति ॥ २
एवमेतन्महाराज यथायं केशवोऽब्रवीत् ।
कार्यस्यास्य तु यच्छेषं तत्ते वक्ष्यामि पृच्छतः ॥ ३
अहं च पर्वतश्चैव स्वस्रीयो मे महामुनिः ।
वस्तुकामावभिगतौ सृञ्जयं जयतां वरम् ॥ ४
तत्र संपूजितौ तेन विधिदृष्टेन कर्मणा ।
सर्वकामैः सुविहितौ निवसावोऽस्य वेश्मनि ॥ ५
व्यतिक्रान्तासु वर्षासु समये गमनस्य च । C. 12. 1093 B. 12. 31. 6 K. 12. 30. 6

सर्वे स्म (for सर्वस्य). —[b]) K$_{3.5}$ V$_1$ B (except B$_2$) Dn D$_{2.3.5.6.8}$ भगवान् (for ऽयं महान्). —[c]) K$_{3.5}$ V$_1$ B Da Dn D$_{4.6.7}$ S ते; D$_{2.3.5.8}$ सं (for वै). —[d]) K$_{3.5}$ B$_1$ D$_{4.7}$ S नरेश्वर (D$_7$ G$_2$ M$_2$ °रः); B$_2$ Da महीपते; D$_{2.3.8}$ नरोत्तमं.

Colophon om. in K$_1$ (cf. v. l. 39). —*Sub-parvan:* K$_{2-5}$ V$_1$ B D (except D$_8$) S (except G$_3$) राजधर्म. —*Adhy. name:* K$_3$ Bo.$_{3-5}$ D$_4$ नारदपर्वतोपाख्यानं; Dn$_1$ भगवद्वाक्यं; T$_1$ G पर्वतनारदसंवादः; M$_2$ पर्वतनारदाख्यानं. —*Adhy. no.* (figures, words or both): K$_{2.5}$ B$_{2.4}$ Da Dn D$_{2.7}$ S 30 (as in text); D$_8$ 29. —*Śloka no.:* Dn$_1$ 45; D$_8$ 44.

31

☞ K$_1$ om. from 1 up to सृञ्जयोऽपि सुतं (in 30[a]) (cf. v. l. 12. 30. 39).

1 D$_8$ T$_1$ om. the ref. —[a]) D$_1$ गता (for राजा). Ś$_1$ K$_{4.5}$ D$_{1.4}$ पांडुपुत्रो. Bo.$_{4.5}$ T$_1$ G ततो धर्म(Bo.$_{4.5}$ ततः पांडु)सुतो राजा. — Before 1[cd], K$_4$ D$_{2.3.5.6}$ ins. युधिष्ठिर उवाच. —[c]) Da$_1$ भगवान्.

2 B$_1$ om. 2–3. —[a]) D$_7$ [अ]थ (for स). K (K$_1$ om.) V$_1$ Bo.$_{3-5}$ Dn D$_{2-6}$ तु स (for स च). B$_2$ Da D$_7$ S देवर्षिर् (for च मुनिर्). —[d]) B$_2$ D$_6$ सुवर्णष्ठीविसंभवं.

3 B$_1$ om. 3 (cf. v. l. 2). Before 3, K$_{2.4.5}$ V$_1$ (marg.) Bo.$_{2-5}$ Da Dn D$_{2.3.5.6}$ M$_4$ ins. नारद उवाच. —[a]) B$_2$ Da एव (for एतन्). K$_3$ V Bo.$_{3-5}$ D$_{2-6.8}$ M$_2$ महाबाहो (for °राज). —[b]) D$_1$ यथाग्रं. —[c]) T$_1$ G तस्याः कथाया यच्छेषं. —[d]) Bo.$_4$ (m as in text) तव; D$_1$ ततो (for तत्ते). B$_2$ भारत (for पृच्छतः).

4 [a]) D$_4$ अयं (for अहं). —[b]) Ś$_1$ स्वस्रीयी; B$_1$ स्वश्रीयो; Dn$_2$ स्वस्त्रियो; D$_1$ स्वस्रेयो; G$_2$ स्वस्रीयो. Ś$_1$ यो; G$_2$ [ऽ]यं (for मे). D$_7$ महामतिः (for °मुनिः). —[c]) M$_1$ अ(*sup. lin.* व)स्तकामाव्. M$_2$ [उ]पगतौ (for [अ]भि°). —[d]) D$_1$ तुषतां (for जयतां).

5 [a]) Ś$_1$ K$_4$ D$_1$ अत्र (for तत्र). K$_{2.3.5}$ V$_1$ B (except B$_2$) Da Dn D$_{2.3.5.6.8}$ तत्रा(Bo.$_5$ °दा)वां पूजितौ (D$_8$ °तस्) तेन. —[c]) Bo.$_2$ D$_1$ सु(D$_1$ स)विहितैर्. —[d]) K$_4$ D$_8$ निवसामो(D$_8$ °यो)स्य; D$_{2.3}$ निवासायास्य; D$_7$ निवासो यस्य; M$_4$ न्यवसावास्य.

6 [a]) K$_3$ D$_{6.8}$ अति° (for व्यति°). D$_2$ om.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 1093 B. 12. 31. 6 K. 12. 30. 6 पर्वतो मामुवाचेदं काले वचनमर्थवत् ॥ ६
आवामस्य नरेन्द्रस्य गृहे परमपूजितौ ।
उषितौ समये ब्रह्मंश्चिन्त्यतामत्र सांप्रतम् ॥ ७
ततोऽहमब्रुवं राजन्पर्वतं शुभदर्शनम् ।
सर्वमेतत्त्वयि विभो भागिनेयोपपद्यते ॥ ८
वरेण छन्द्यतां राजा लभतां यद्यदिच्छति ।
आवयोस्तपसा सिद्धिं प्राप्नोतु यदि मन्यसे ॥ ९
तत आहूय राजानं सृञ्जयं शुभदर्शनम् ।
पर्वतोऽनुमतं वाक्यमुवाच मुनिपुंगवः ॥ १०
प्रीतौ स्वो नृप सत्कारैस्तव ह्यार्जवसंभृतैः ।
आवाभ्यामभ्यनुज्ञातो वरं नृवर चिन्तय ॥ ११
देवानामविहिंसायां यद्भवेन्मानुषक्षमम् ।
तद्गृहाण महाराज पूजार्हो नौ मतो भवान् ॥ १२

सृञ्जय उवाच ।

प्रीतौ भवन्तौ यदि मे कृतमेतावता मम ।
एष एव परो लाभो निर्वृत्तो मे महाफलः ॥ १३

नारद उवाच ।

तमेवंवादिनं भूयः पर्वतः प्रत्यभाषत ।
वृणीष्व राजन्संकल्पो यस्ते हृदि चिरं स्थितः ॥ १४

सृञ्जय उवाच ।

अभीप्सामि सुतं वीरं वीर्यवन्तं दृढव्रतम् ।
आयुष्मन्तं महाभागं देवराजसमद्युतिम् ॥ १५

वर्षासु. — ^{d}) D1 वचसम् (for वचनम्). Da अब्रवीत् (for अर्थवत्).

7 ^{a}) D1 वरेंद्रस्य (sic) (for नरेन्द्रस्य). — ^{b}) V1 °पूजिते; D1 °पूजिता; D4 °पूजितो. — ^{c}) D1 तोषेतौ (sic); M4 उषितो. D7 T G3. 4 M1–3 समयं; G1. 2 स्म वयं (for समये). — ^{d}) D1 विजिताम् (for चिन्त्य°). V1 Bo. 2. 4. 5 D2. 3, 5. 7 S (except M1. 3) अस्य (for अत्र). K2 Dn तद्विचिंतय सांप्रतं.

8 ^{a}) M1. 3 अब्रुवन्. — ^{c}) Da एव (for एतत्).

9 ^{a}) D1 पुरेणश्छद्य मां राजा (sic). — ^{b}) Da1 इच्छसि. — ^{c}) D1 तमसा; T2 तपसां. Ś1 सिद्धिः; D7 विद्धं (for सिद्धिं). — ^{d}) T2 प्रयातु (for प्राप्नोतु).

10 ^{a}) D7 तत्र (for तत). D1 आदय; D7 चाहूय (for आहूय). — ^{b}) K3. 5 V1 B D (except D2) S जयतां वरं (for शुभदर्शनम्). — ^{c}) K2. 3 [s]नुमतो; Bo. 3 (marg.). 5 D2. 3. 5. 6. 8 मम तद् (for ऽनुमतं). — ^{d}) D7 अवोचं; T G1. 3. 4 अवोचत् (for उवाच). K3. 3. 5 V1 B Dn D2–6. 8 M कुरुपुंगव (B5 M2 °वः); K4 मुनिपुंगव; Da D7 T G कुरुनंदन.

11 ^{a}) D4 प्रीतो. Da2 सो; D6 स्म; M4 स्वै (for स्वो). G2 यदि (for नृप). K3 संस्कारो. — ^{b}) K2. 5 B3 D7 T1 G4 भवदार्जवसंभृतैः; K3 भवंतौ जव°; V1 Bo–2. 6 Dn D2. 3. 5. 6. 8 भवतोर्जव°; B4 damaged; Da T2 भवतो जन°; G1–3 भवता भूप (G2 तूप-); M भवतार्जव°. — ^{c}) D7 अप्यनु° (for अभ्यनु°). — ^{d}) G3 तभूप (for नृवर). D1 वरो नृवर चिंतय; D6. 7 T2 वरं नृप विचिंतय.

12 ^{a}) V1 B1. 2. 5 Da D6 T1 G1 M1. 3 अपि हिंसायां; D4 अविहिंसायै. — ^{b}) K2. 3 V1 B Da Dn D3. 5. 6. 8 न (for यद्). K4 V1 B1–4 Dn D2. 3. 5. 6. 8 मानुषक्षयं (V1 B4 °यः); T2 °षैः क्षमं; G °षे क्षमं; M1. 3 °षं क्षमं. — ^{d}) K (K1 om.) Dn D2. 6 पूजार्हौ; B4 (marg.) D3. 5 पुत्रार्हो. B4 (marg.) D3. 5 नो; D1 मे (for नौ). — After 12, Ś1 D1 ins. an addl. colophon.

13 V1 reads on marg. 13–14 with the ref.; K3 D8 om. the ref. — ^{a}) D4 प्रीतो. T1 G1. 3. 4 हि (for मे). — ^{c}) D2. 3. 5. 8 महा-; M4 वरो (for परो). — ^{d}) D1–3 निवृत्तो.

14 V1 reads 14 on marg. Before 14, several MSS. om. the ref. — ^{a}) Dn2 M1 तमेव. T2 वीरं (for भूयः). — ^{b}) K4 प्रतिभाषत. B1 प्रत्यभाषत पर्वतः. — ^{c}) D4 वृणीथ. K3. 5 V1 B Da Dn D2–6. 8 संकल्पं. K4 वरं वृणीष्व संकल्पो; D7 S शृणु राजन्स्वसं(D7 °न्स्वयं; G °न्सुसं)कल्पं. — ^{d}) K2. 3. 5 B D (except D1. 4) T G M2 यत्ते (for यस्ते). D8 om. चिरं. K2. 3 V1 B5 Dn D2. 6. 7 T G M2 चिरं स्थितं; Bo. 1. 3. 4 D1. 3–5 चिरस्थितं (D1. 4 °तः); B2 विराक्षितं; Da विव-क्षितं (for चिरं स्थितः).

15 Ś1 K2–5 D4. 7. 8 S om. the ref. — ^{a}) K4 स वव्रे तु; D6. 8 अभीप्स्यामि; D7 °प्सति; S °प्ससि (G1 °प्स हि; G2 °प्स्यसि). Ś1 M4 वरि. — ^{c}) Da महात्मानं (for °भागं). — ^{d}) M2 -प्रभं (for -द्युतिम्).

16 V1 reads on marg. 16–17 with the ref.;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पर्वत उवाच ।

भविष्यत्येष ते कामो न त्वायुष्मान्भविष्यति ।
देवराजाभिभूत्यर्थं संकल्पो ह्येष ते हृदि ॥ १६
सुवर्णष्ठीवनाच्चैव स्वर्णष्ठीवी भविष्यति ।
रक्ष्यश्च देवराजात्स देवराजसमद्युतिः ॥ १७

नारद उवाच ।

तच्छ्रुत्वा सृञ्जयो वाक्यं पर्वतस्य महात्मनः ।
प्रसादयामास तदा नैतदेवं भवेदिति ॥ १८
आयुष्मान्मे भवेत्पुत्रो भवतस्तपसा मुने ।
न च तं पर्वतः किंचिदुवाचेन्द्रव्यपेक्षया ॥ १९
तमहं नृपतिं दीनमब्रुवं पुनरेव तु ।
स्मर्तव्योऽहं महाराज दर्शयिष्यामि ते स्मृतः ॥ २०
अहं ते दयितं पुत्रं प्रेतराजवशं गतम् ।
पुनर्दास्यामि तद्रूपं मा शुचः पृथिवीपते ॥ २१
एवमुक्त्वा तु नृपतिं प्रयातौ स्वो यथेप्सितम् ।
सृञ्जयश्च यथाकामं प्रविवेश स्वमन्दिरम् ॥ २२
सृञ्जयस्याथ राजर्षेः कस्मिंश्चित्कालपर्यये ।
जज्ञे पुत्रो महावीर्यस्तेजसा प्रज्वलन्निव ॥ २३
ववृधे स यथाकालं सरसीव महोत्पलम् ।
बभूव काञ्चनष्ठीवी यथार्थं नाम तस्य तत् ॥ २४
तदद्भुततमं लोके पप्रथे कुरुसत्तम ।
बुबुधे तच्च देवेन्द्रो वरदानं महात्मनोः ॥ २५
ततस्त्वभिभवाद्भीतो बृहस्पतिमते स्थितः ।
कुमारस्यान्तरप्रेक्षी बभूव बलवृत्रहा ॥ २६ C. 12. 1113 B. 12. 31. 26 K. 12. 30. 26

Ś1 K2.4 D4.7.8 S om. the ref. — a) B2 Da2 T2 G2 [ए]व (for [ए]ष). — D7 reads 16^{c}–17^{b} after 27^{ab}. — c) V1 B1 -भूत्यर्थः (for -भूत्यर्थं). D1 G1.3 देवराजविभूत्यर्थं; D6 °राजादि°. — d) M3 ह्येषु. D7 T2 नो (for ते). V1 भवेत् (for हृदि).

17 a) Da चापि (for चैव). V1 B Dn D2.3.5.6.8 ख्यातः सुवर्णष्ठीवीति. — b) V1 Dn पुत्रस्तव (for स्वर्णष्ठीवी). Dn2 भवेदिति (for भविष्यति). B D2.3.5.6.8 पुत्र(B5 सुत)स्ते सं(B1.3.4 स; D6 च)भविष्यति. — c) B1.2 रक्षस्व (for रक्ष्यश्च). M1–3 देवराज्ञो(M2 °ज्ञा)सौ (for °राजात्स). B2 D8 तं; T1 G हि; T2 च; M4 वै (for स). Ś1 रक्ष्यः स देवराजश्च. — d) B2 °समद्युतिं.

18 a) K5 Da1 संजयो. — b) Da1 पर्वतश्च. K5 महामुनेः. — d) D4 एव (for एवं). K3 Bo.3 (marg.).5 D4 भविष्यति (for भवेदिति).

19 a) M2.4 च (for मे). D4 पुत्रौ. — b) D7 T G3.4 भवतोस् (for °तस्). Dn1 तपसो. — d) D4 [इं]द्रमुपेक्षया (for [इ]न्द्रव्यपे°).

20 b) K2.8 Dn2 D1 अब्रुवन्; D8 ब्रुवतं (for अब्रुवं). Dn D2 च (for तु). — c) K2 Da2 Dn G4 [ऽ]स्मि; D2 G1.3 हि; T2 [ऽ]यं (for ऽहं). M8 त्वया राजन् (for महाराज). — d) K3.5 D4 नृप; B3 (m as in text).4 Da D2.3.5.8 T2 G2 M2 सुतं (for स्मृतः).

21 a) Bo.5 अहं ते दर्शयिष्यामि. — b) Da -वशे (for °वशं). T2 प्रेतराजवशानुगं. — c) K3 D4 दर्शयिष्यामि तद्रूपं.

22 b) D7 प्रयातस्. K4 स्वौ; Dn2 G1 स्वे; D7 तं; M2 स्व- (for स्वो). Dn2 पथि स्थितं (for यथेप्सितम्). — G2 om. (hapl.) 22^{cd}. — c) Da [अ]पि (for च). D4 यथाकालं (for °कामं). — d) Da1 स्वमंदिरे; S (except M4; G2 om.) स्वकं गृहं.

23 a) Da1 [अ]र्थे; D7 T M1–3 तु; G1–3 च (for [अ]थ). G1 राजर्षे. — c) Da D8 G1 यज्ञे (for जज्ञे). D1 महावीर्यास्.

24 a) K3 D1.4 G2 च (for स). K3.4 Bo Da D4 यथाकामं; G °काले. — b) D4 यथोत्पलं (for महो°). — d) D7 M2 तदर्थं (for यथार्थं). B1 तस्य च; D4 चाभवत् (for तस्य तत्).

25 a) D2.3 अद्भुतमिमं; D4 °ततरं (for °ततमं). — b) Da1 Dn2 प्रथमे; D7 T G प्रथितं; M ववृधे (M4 °ते); Cv पप्रथे (as in text). D7 T G कुरुपुंगव; M1–3 °नंदन; Cv °सत्तम (as in text). — c) B1 ववृधे (for बुबुधे). B2 Da D7 T G तस्य (for तच्च). — d) Da1 वरदांने. K3 V1 Bo.4.5 Dn1 महर्षितः; K5 D4 तपस्विनोः; B1.3 महर्षिणः; B2 Da D2.3.5.8 महर्षिणा; Dn2 D6 महर्षिभिः; D7 G3.4 महर्षिणोः; T G1.2 M मनीषिणोः (for महात्मनोः).

26 a) K2.3.5 Dn1 D4 स्वाभिभवाद्; Da स्वतिभ-

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 1114
B. 12. 31. 27
K. 12. 30. 27

चोदयामास वज्रं स दिव्यास्त्रं मूर्तिसंस्थितम् ।
व्याघ्रो भूत्वा जहीमं त्वं राजपुत्रमिति प्रभो ॥ २७
विवृद्धः किल वीर्येण मामेषोऽभिभविष्यति ।
सृञ्जयस्य सुतो वज्र यथैनं पर्वतो ददौ ॥ २८
एवमुक्तस्तु शक्रेण वज्रः परपुरंजयः ।
कुमारस्यान्तरप्रेक्षी नित्यमेवान्वपद्यत ॥ २९
सृञ्जयोऽपि सुतं प्राप्य देवराजसमद्युतिम् ।
हृष्टः सान्तःपुरो राजा वननित्योऽभवत्तदा ॥ ३०
ततो भागीरथीतीरे कदाचिद्वननिर्झरे ।
धात्रीद्वितीयो बालः स क्रीडार्थं पर्यधावत ॥ ३१

पञ्चवर्षकदेशीयो बालो नागेन्द्रविक्रमः ।
सहसोत्पतितं व्याघ्रमाससाद महाबलः ॥ ३२
तेन चैव विनिष्पिष्टो वेपमानो नृपात्मजः ।
व्यसुः पपात मेदिन्यां ततो धात्री विचुक्रुशे ॥ ३३
हत्वा तु राजपुत्रं स तत्रैवान्तरधीयत ।
शार्दूलो देवराजस्य माययान्तर्हितस्तदा ॥ ३४
धात्र्यास्तु निनदं श्रुत्वा रुदत्याः परमार्तवत् ।
अभ्यधावत तं देशं स्वयमेव महीपतिः ॥ ३५
स ददर्श गतासुं तं शयानं पीतशोणितम् ।
कुमारं विगतानन्दं निशाकरमिव च्युतम् ॥ ३६

वद्; T_2 स भगवान्; M_2 त्वभिभवेत् (for °वाद्). G_1 M_3 प्रीतो (for भीतो). — ^{d}) Da नित्यमेवान्वपद्यत (= 29^d).

27 ^{a}) $K_{3.5}$ D_4 नोदयामास. K_3 Dn_1 तद्वज्रं; $K_{3.5}$ D_4 वै वज्रं; D_2 स वज्रं (by transp.); $D_{3.5.8}$ वज्रं वै. D_7 S स वज्रं चोदयामास. — ^{b}) $K_{2.5}$ V_1 B Da Dn $D_{3.5.6.8}$ S मूर्तिमत्स्थितं; D_2 °मास्थितं; D_7 मृत्युपस्थितं. — After 27^{ab}, D_7 reads 16^e–17^b. — ^{c}) D_7 T_1 $G_{1.3.4}$ तं (for त्वं).

28 ^{a}) K_2 Dn M_4 प्रवृद्धः (for विवृद्धः). — ^{b}) T_2 M_4 एव (for एषो). — K_4 om. (hapl.) 28^c–29^d. — ^{c}) V_1 Bo Da Dn_2 $D_{1-3.5.6}$ T_2 सुतं. D_2 $G_{1.2}$ M_3 वज्रं; T_2 वज्री (for वज्र). — ^{d}) Da यमेनं; D_7 T $G_{1.3.4}$ यथेमं; G_2 अथेमं (for यथैनं). K_3 D_4 नारदो (for पर्वतो). K_5 $B_{1.4}$ Dn D_6 [अ]ब्रवीत् (for ददौ).

29 K_4 om. 29 (cf. v. l. 28). — ^{b}) $Ś_1$ $D_{3.4}$ परपुरंजय. — ^{c}) $Ś_1$ D_1 कुमारस्यांतरापेक्षी; $K_{2.3.5}$ $B_{1.4}$ (m as in text) Dn $D_{4.6}$ °मंतरप्रेक्षी. — ^{d}) $K_{3.5}$ D_4 G_2 M [अ]न्ववर्तत; B_1 °पद्यते; D_7 T $G_{1.3.4}$ [अ]भ्यवर्तत (for [अ]न्वपद्यत).

30 K_1 om. सृञ्जयोऽपि सुतं (cf. v. l. 1). — ^{b}) Da_3 D_6 -द्युतिः (for -द्युतिम्). — ^{c}) $Ś_1$ हृष्टः; K_1 D_1 हृष्ट्वा; Da रुष्टः; $M_{1.3}$ तुष्टः (for हृष्टः). K_1 मातुः पुरो; Bo शांतः पुरो; D_6 सांतःपुरे. — ^{d}) $Ś_1$ K_1 D_1 वर(K_1 °रं)हृष्टो (for वननित्यो). V_1 B (except B_2) Dn $D_{2.3.5.6.8}$ बभूव ह (for ऽभवत्तदा.)

31 ^{b}) K_5 V_1 B (except B_2) D (except $D_{4.7}$) कदाचिन्निर्जने वने. — ^{c}) B_2 Da बालोसौ; D_6 बालस्तु; D_7 बालस्य; D_8 बहुलः; M_2 बालः सन् (for बालः स). — ^{d}) V_1 पर्यधावतां; Da °धावतः; T_1 G_{2-4} °धावयत्.

32 ^{a}) K_4 B_2 Dn_1 D_4 पंचवर्षै(B_2 °र्षि°; D_4 °र्षे)-कदेशीयो; G_1 °वर्षकदर्शी यो. — ^{b}) $Ś_1$ K_1 D_1 °संनिभः (for °विक्रमः). — ^{c}) $Ś_1$ K_1 D_1 सिंहश्चोत्पतितं बालम्; Cv as in text. — ^{d}) K_5 V_1 $Bo_{.3.5}$ D (except Da $D_{1.7}$) G_2 M Cv महाबलं.

33 ^{a}) $K_{3.5}$ V_1 B D (except D_1) S Cv स बालस्तेन निष्पिष्टो. — ^{c}) D_1 व्यासुः. — ^{d}) Da_2 विचक्रुशेः (sic).

34 D_1 transp. 34^{ab} and 34^{cd}, reading 34^{cd} twice. — ^{a}) K_3 D_4 तं हत्वा (for हत्वा तु). $M_{1.3}$ सा (for स). — ^{d}) B_3 (m as in text) पपात (for मायया). G_2 तथा (for तदा).

35 ^{b}) K_5 V_1 B D (except Dn_2) S (except $M_{3.4}$) रुदंत्याः. D_1 परमार्थवत्.

36 ^{ab}) $Ś_1$ K_1 संददर्श; B_2 Da_2 ददर्श च; Da_1 ददर्शय (for स ददर्श). K_3 V_1 B D (except D_1) S (except $M_{1.3}$) transp. गतासुं and शयानं. $Ś_1$ K_1 स (for तं). — V_1 reads 36^{cd} on marg. — ^{c}) G_3 T_2 निहतानंदं (for विगता°). — ^{d}) B_1 द्युतिं; G_3 स्थितं (for च्युतम्). $Ś_1$ $K_{1.4}$ V_1 D_1 निशाकरसमद्युति.

37 ^{a}) $Bo_{.3-5}$ $D_{3.5.8}$ उत्संग (for उत्सङ्गम्). — ^{b}) B (except B_5) Dn_1 -मानसः; Dn_3 $D_{5.6}$

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

स तमुत्सङ्गमारोप्य परिपीडितवक्षसम् ।
पुत्रं रुधिरसंसिक्तं पर्यदेवयदातुरः ॥ ३७
ततस्ता मातरस्तस्य रुदन्त्यः शोककर्शिताः ।
अभ्यधावन्त तं देशं यत्र राजा स सृञ्जयः ॥ ३८
ततः स राजा सस्मार मामन्तर्गतमानसः ।
तच्चाहं चिन्तितं ज्ञात्वा गतवांस्तस्य दर्शनम् ॥ ३९
स मयैतानि वाक्यानि श्रावितः शोकलालसः ।
यानि ते यदुवीरेण कथितानि महीपते ॥ ४०
संजीवितश्चापि मया वासवानुमते तदा ।
भवितव्यं तथा तच्च न तच्छक्यमतोऽन्यथा ॥ ४१
अत ऊर्ध्वं कुमारः स स्वर्णष्ठीवी महायशाः ।
चित्तं प्रसादयामास पितुर्मातुश्च वीर्यवान् ॥ ४२
कारयामास राज्यं स पितरि स्वर्गते विभुः ।
वर्षाणामेकशतवत्सहस्रं भीमविक्रमः ॥ ४३
तत इष्ट्वा महायज्ञैर्बहुभिर्भूरिदक्षिणैः ।
तर्पयामास देवांश्च पितॄंश्चैव महाद्युतिः ॥ ४४
उत्पाद्य च बहून्पुत्रान्कुलसंतानकारिणः ।
कालेन महता राजन्कालधर्ममुपेयिवान् ॥ ४५
स त्वं राजेन्द्र संजातं शोकमेतन्निवर्तय ।
यथा त्वां केशवः प्राह व्यासश्च सुमहातपाः ॥ ४६
पितृपैतामहं राज्यमास्थाय धुरमुद्वह ।
इष्ट्वा पुण्यैर्महायज्ञैरिष्टाँल्लोकानवाप्स्यसि ॥ ४७ C. 12. 1134 B. 12. 31. 47 K. 12. 30. 47

इति श्रीमहाभारते शान्तिपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥

-लक्षणं; G_2 -वत्सलं (for -वक्षसम्). K_5 D_4 परिपाटितवक्षसं. — V_1 reads 37^c–39^b on marg. — ^{c}) K_1 पुत्रे. $Ś_1$ $K_{1.2.4}$ D_1 रुधिरसंयुक्तं; D_7 °संसक्तं; $M_{1.3}$ °सिक्तांगं (for °संसिक्तं).

38 V_1 reads 38 on marg. — ^{a}) K_5 चास्य (for तस्य). — ^{b}) K_3 D_8 G_2 रुदत्यः. $Ś_1$ $K_{1.2.4}$ V_1 B Dn_1 $D_{1-3.5.6.8}$ शोककर्षिताः. — ^{c}) Da D_8 M_1 अभ्यधावत.

39 V_1 reads 39^{ab} on marg. — ^{a}) $D_{2.3.5.8}$ तु (for स). — ^{b}) Da D_7 $M_{1.3}$ मामंतर्गतमानसाः (D_7 $M_{1.3}$ °सं); Dn_1 मामेव गतमानसः; M_2 मामंतर्गतचेतनः. — ^{c}) $K_{1.5}$ B_4 D_7 S तस्य; $K_{3.5}$ Dn_1 D_8 तदा; B_2 Da तत्र; $D_{2.3.5}$ ततो (for तच्च). Dn_1 चिंतनं. — ^{d}) $D_{6.7}$ तत्र (for तस्य).

40 ^{a}) T_2 यन् (for स). D_7 T $M_{1.3.4}$ तानि (for [ए]तानि). Dn मयैतानि च वाक्यानि; G समये तानि वा°. — ^{c}) M_2 लोकवीरेण (for यदु°). — ^{d}) T_1 $G_{1.3.4}$ श्रावितानि (for कथितानि).

41 ^{a}) K_4 $Bo_{.5}$ Dn_2 $D_{2.3.5-8}$ स (for सं-). $K_{2.5}$ V_1 B (except B_2) D (except $D_{1.4.7}$) पुनर् (for मया). — ^{b}) $Ś_1$ K_1 तथा; D_7 S पुनः (for तदा). — ^{c}) V_1 Dn_1 T_2 तदा; $D_{2.3.5.8}$ $M_{2.4}$ यथा (for तथा). D_1 यश्च; G_1 यद्वन्; $M_{2.4}$ यच्च (for तच्च). — ^{d}) B_2 च (for तत्).

42 ^{a}) K_2 Dn D_1 T_2 तत (for अत). Da_1 कुमारं. $K_{2.3}$ $Bo_{.3-5}$ Da_2 Dn_1 G_4 तु; D_7 G_{1-3} च (for स). — ^{b}) B_2 Da_1 [इ]ति नामतः; Dn_1 महामनाः (for °यशाः). — ^{d}) $Ś_1$ K_1 मातुः पितुश्च (by transp.).

43 ^{a}) $K_{2.3}$ V_1 B D (except $D_{1.6}$) S च (for स). — ^{b}) K_2 B (except B_2) Dn $D_{2.3.5.6.8}$ नृप; K_{3-5} D_4 T $G_{1.2}$ भुवि; V_1 नृपे (for विभुः). Da पितर्युपरते प्रभुः. — ^{c}) $Ś_1$ K_1 एकं (for एक-). $K_{3.5}$ V_1 B D (except $D_{1.7}$) वर्षाणां शतमेकं च (K_5 वा). — ^{d}) V_1 (by corr.) सहस्रं भूरिदक्षिणः; B_2 °स्रं परिवत्सरान्.

44 ^{a}) Dn ईजे (for इष्ट्वा). — ^{b}) $Bo_{.5}$ $D_{3.5}$ भूरिदाक्षिणः. — ^{d}) T_2 च स (for चैव). $Ś_1$ $K_{1.2}$ D_1 महाद्युते. M_4 पितॄंश्च परमद्युतिः.

45 ^{b}) V_1 °संततिकारिणः; B_2 Da °संतानकारकान्. — D_1 reads 45^c–47^d twice. — ^{c}) D_8 तावत्; G_2 $M_{1.3}$ राजा (for राजन्). — ^{d}) K_1 उपैयिवान्; K_4 उपागतः.

46 For repetition in D_1, cf. v. l. 45. — ^{a}) G_{1-3} एवं (for स त्वं). — ^{b}) $K_{2.3}$ Dn G_4 पुनं; K_5 V_1 $Bo_{.2.4.5}$ $D_{1.4}$ T_2 M एतं; G_{1-3} एव (for एतन्). — ^{c}) $Ś_1$ $K_{1.4}$ D_1 [अ]यं (for त्वां). — ^{d}) $Ś_1$ K_1 D_1 [ए]व महामुनिः; $K_{3.5}$ सुमहामतिः; B_1 Da

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२

C. 12. 1135
B. 12. 32. 1
K. 12. 31. 1

वैशंपायन उवाच ।

तूष्णींभूतं तु राजानं शोचमानं युधिष्ठिरम् ।
तपस्वी धर्मतत्त्वज्ञः कृष्णद्वैपायनोऽब्रवीत् ॥ १
प्रजानां पालनं धर्मो राज्ञां राजीवलोचन ।
धर्मः प्रमाणं लोकस्य नित्यं धर्मानुवर्तनम् ॥ २
अनुतिष्ठस्व वै राजन्पितृपैतामहं पदम् ।
ब्राह्मणेषु च यो धर्मः स नित्यो वेदनिश्रितः ॥ ३
तत्प्रमाणं प्रमाणानां शाश्वतं भरतर्षभ ।
तस्य धर्मस्य कृत्स्नस्य क्षत्रियः परिरक्षिता ॥ ४
तथा यः प्रतिहन्त्यस्य शासनं विषये नरः ।
स बाहुभ्यां विनिग्राह्यो लोकयात्राविघातकः ॥ ५
प्रमाणमप्रमाणं यः कुर्यान्मोहवशं गतः ।
भृत्यो वा यदि वा पुत्रस्तपस्वी वापि कश्चन ।
पापान्सर्वैरुपायैस्तान्नियच्छेद्घातयेत वा ॥ ६
अतोऽन्यथा वर्तमानो राजा प्राप्नोति किल्बिषम् ।
धर्मं विनश्यमानं हि यो न रक्षेत्स धर्महा ॥ ७

D8 °यशाः; D4 °द्युतिः.

7 =(var.) 5. 130. 14. — ^{a}) $K_{3.5}$ B (except B_2) Da Dn D_6 M_2 दंडनीत्यां (for °नीत्या). G_1 यथा (for यदा). — ^{b}) K_4 कार्त्स्नेन. D_3 गम्यते (for वर्तते). — D_7 G_2 om. (hapl.) 7^{cd}. — ^{c}) S (except M_2; G_2 om.) ततः (for तदा). — ^{d}) $K_{2.3}$ D_2 $G_{1.3.4}$ M_{1-3} कालश्रेष्ठः; K_4 $D_{4.8}$ कालः श्रेष्ठ (D_4 °ष्ठं); V_1 कालज्येष्ठं; $Bo._{2.3.5}$ Da कालश्रेष्ठं; Dn D_6 कालसृष्टं (for कालः श्रेष्ठः). M_4 स कालः संप्रवर्तते.

8 ^{a}) B Da Dn ततः (for भवेत्). — ^{c}) M_4 स तेषाम् (for सर्वेषाम्). — ^{d}) D_3 धर्मे च (for नाधर्मे). K_3 D_{2-5} मतिः (for मनः).

9 Dn_2 transp. 9 and 10. — ^{a}) D_8 योगक्षेमः प्रवर्तेत. — ^{c}) B_2 Da दैवतानि (for वैदिकानि). V_1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 2677 B. 12. 69. 82 K. 12. 69. 9 योगक्षेमाः प्रवर्तन्ते प्रजानां नात्र संशयः ।
वैदिकानि च कर्माणि भवन्त्यविगुणान्युत ॥ ९
ऋतवश्च सुखाः सर्वे भवन्त्युत निरामयाः ।
प्रसीदन्ति नराणां च स्वरवर्णमनांसि च ॥ १०
व्याधयो न भवन्त्यत्र नाल्पायुर्दृश्यते नरः ।
विधवा न भवन्त्यत्र नृशंसो नाभिजायते ॥ ११
अकृष्टपच्या पृथिवी भवन्त्योषधयस्तथा ।
त्वक्पत्रफलमूलानि वीर्यवन्ति भवन्ति च ॥ १२
नाधर्मो विद्यते तत्र धर्म एव तु केवलः ।
इति कार्तयुगानेतान्गुणान्विद्धि युधिष्ठिर ॥ १३
दण्डनीत्या यदा राजा त्रीनंशाननुवर्तते ।
चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्तते ॥ १४
अशुभस्य चतुर्थांशस्त्रीनंशाननुवर्तते ।
कृष्टपच्यैव पृथिवी भवन्त्योषधयस्तथा ॥ १५
अर्धं त्यक्त्वा यदा राजा नीत्यर्धमनुवर्तते ।
ततस्तु द्वापरं नाम स कालः संप्रवर्तते ॥ १६
अशुभस्य तदा अर्धं द्वावंशावनुवर्तते ।
कृष्टपच्यैव पृथिवी भवत्यल्पफला तथा ॥ १७

B Da Dn D6. 8 सर्वाणि (for कर्माणि). — K3 om. (hapl.) 9^{d}–10^{a}. — ^{d}) K2. 4 V1 B1. 2 Dn D1. 6 M2. 4 [अ]पि; K5 D4. 7. 8 T1 G1. 3. 4 [अ]धि-; D2. 3. 5 द्वि-; T2 G2 [अ]थ; M1 [अ]प-; M3 [अ]व- (for [अ]वि-). B1 D3 -गुणान्विताः (D8 °ता); B4 °न्वित; T2 G1 °न्वितं (for °न्युत).

10 K3 om. 10^{a} (cf. v. l. 9). Dn2 transp. 9 and 10. — ^{a}) Dn2 कृतवश्च. K4 न (for च). D8 गुणाः (for सुखाः). — ^{b}) Dn2 [अ]पि; D7 T G2–4 M2 [अ]थ; M4 च (for [उ]त). B1 सदा तदा (for निरामयाः). G1 प्रभवंत्यनिरामयाः. — ^{c}) B1 भवंत्युत; M4 प्रसीदति (for प्रसीदन्ति). — ^{d}) Ś1 स्वरवर्णा (for स्वरवर्ण-). Ś1 K1. 2 D1. 8 वै; M4 [उ]त (for च).

11 ^{a}) D2. 3 (by corr. as in text). 5 भयं तत्र (for भवन्त्यत्र). — Bo. 5 G4 om. (hapl.) 11^{bc}. — ^{b}) K1 नाल्पायुं. — ^{c}) K3 D4 विवादा (for विधवा). D6. 8 भवति. — ^{d}) D7 S नात्र (for नाभि-). V1 B Da Dn D6 कृपणो न तु जायते.

12 ^{a}) = 12. 29. 132^{a}. D1 अकृष्टपश्या; D8 °पंचम (sic). — ^{b}) D4 भवेति. Ś1 K1. 2 Dn1 D2–5 G1 औषधयस्. K3 तदा (for तथा). D8 भवत्यौषधमालिनी. — V1 reads 12^{c}–15^{d} on marg. — ^{d}) V1 [उ]त (for च).

13 V1 reads 13 on marg. — ^{a}) D7 T1 G2–4 अधर्मो विद्यते नात्र. — ^{b}) D4 धर्मा. V1 Dn D6 केवलं; D1 केवलाः. — ^{c}) K2 कांत-; D2. 7 कर्त-; D3 कार्त-; D5 कार्त्र- (for कार्त-). Ca cites कार्तयुगान् (as in text). V1 -युगान्धर्माद्; Dn2 -युगेनैतान्; D5 -युगानेतद्; G2 -गुणानेतान् (for -युगा°). — ^{d}) K3. 5 B Da Dn D1. 2. 8 m. 5. 6 धर्मान्; V1 एतान्; D8 अंशान् (for गुणान्).

14 V1 reads 14 on marg. — ^{a}) K2. 3 B (except B2) Da2 Dn1 D3. 5. 6 दंडनीत्यां (for °नीत्या). — ^{b}) D8 त्रीनंसान्; G1 त्रिदशान्; M1 नीत्यर्धम् (for त्रीनंशान्). — D1 M4 om. (hapl.) 14^{c}–16^{b}. Ś1 reads (*sec. m.*) 14^{cd} on marg. K1 reads 14^{c}–15^{b} twice. D8 repeats 14^{c} after 15^{ab}. — ^{c}) V1 D2. 3. 5 संत्यज्य (for उत्सृज्य). — ^{d}) S (M4 om.) ततस् (for तदा).

15 D1 M4 om. 15 (cf. v. l. 14). G2 om. (hapl.) 15–16. K1 reads 15^{ab} twice. V1 reads 15 on marg. — ^{a}) K5 अंशमस्य; D2 आशुभस्य; Ca अशुभस्य (as in text). B1 तदादूर्ध्वं; M1 चतुर्थांशस्. D7 T G1. 3. 4 अधर्मस्य चतुर्थांशस् (G1 °शं). — ^{b}) B1 द्वावंशाव् (for त्रीनंशान्). — After 15^{ab}, D8 repeats 14^{c}. Ś1 K2 om. (hapl.) 15^{c}–16^{b}. — ^{c}) B1 कृष्णपच्यैव; B4 D4. 7 T G1. 3. 4 M2 अकृष्टपच्या; D2. 3. 5 कृष्टपच्ये(D2 °त्ये)व; M1. 3 °पच्या च (for °पच्यैव). — ^{d}) K4 D2. 3. 5 G1 M1 औषधयस्; B1 अर्धफला. K3. 5 तदा (for तथा).

16 G2 om. 16 (cf. v. l. 15); Ś1 K2 D1 M4 om. 16^{ab} (cf. v. l. 15, 14). K1 reads 16^{ab} on marg. — ^{a}) Bo शुद्धं; D7 अर्थं (for अर्धं). D8 यथा (for यदा). — ^{b}) K1. 4 V1 B Dn D2. 3. 5. 6 G4 M2 नीत्यर्थम्; K5 नीत्या धर्मं; D8 नीत्याधर्मम् (for नीत्य°). — ^{c}) K1 ततस्तै; K3. 5 D4 ततश्च; D2 तदावद्; D3. 5 तदा च; M1. 3 ततस्तद् (for ततस्तु). — ^{d}) B2 Da कालः संपरिवर्तते.

17 Da G1 om. (hapl.) 17^{ab}. — ^{a}) M4 अधर्मस्य (for अशुभस्य). Ś1 K4 D1 M4 तदार्धत्वं; K1. 2 यदार्धत्वं; K3 V1 B2. 5 D2–5 M4 तदा त्वर्धं; K5 Bo. 1. 4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डनीतिं परित्यज्य यदा कार्त्स्न्येन भूमिपः ।
प्रजाः क्लिश्नात्ययोगेन प्रविश्यति तदा कलिः ॥ १८
कलावधर्मो भूयिष्ठं धर्मो भवति तु क्वचित् ।
सर्वेषामेव वर्णानां स्वधर्माच्च्यवते मनः ॥ १९
शूद्रा भैक्षेण जीवन्ति ब्राह्मणाः परिचर्यया ।
योगक्षेमस्य नाशश्च वर्तते वर्णसंकरः ॥ २०
वैदिकानि च कर्माणि भवन्ति विगुणान्युत ।
ऋतवो नसुखाः सर्वे भवन्त्यामयिनस्तथा ॥ २१
ह्रसन्ति च मनुष्याणां स्वरवर्णमनांस्युत ।
व्याधयश्च भवन्त्यत्र म्रियन्ते चागतायुषः ॥ २२
विधवाश्च भवन्त्यत्र नृशंसा जायते प्रजा ।
क्वचिद्वर्षति पर्जन्यः क्वचित्सस्यं प्ररोहति ॥ २३
रसाः सर्वे क्षयं यान्ति यदा नेच्छति भूमिपः ।
प्रजाः संरक्षितुं सम्यग्दण्डनीतिसमाहितः ॥ २४
राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च ।
युगस्य च चतुर्थस्य राजा भवति कारणम् ॥ २५ C. 12. 2693 B. 12. 69. 98 K. 12. 69. 25

Dn D6.8 T G2–4 M1–3 यदा त्वर्धं; B3 यदा तूर्ध्वं (for तदा अर्धं as in D7 only). — c) D1.2 कृष्टपश्ये- (D2 °त्ये)व; D3.5.7 सं(D7 अ)कृष्टपच्या; D8 कृष्ण-पंचैव; G2 M3 कृष्टपच्येव (for °पच्यैव). — d) B1 T1 M1.3 भवंति; B4 damaged; G1 फलति. K2.3 V1 Bo.2.3.5 Da Dn1 D6 [अ]र्धफला; B1 [ओ]षधयस्; B4 damaged; Dn2 [अ]र्थफला (for [अ]ल्प°). K3.5 V1 B2 Da Dn D1.6–8 S (except T2) तदा (for तथा).

18 a) Da D2.3.5 समुत्सृज्य (for परित्यज्य). — b) G2 तदा (for यदा). D7 G2 M2.4 भूपतिः (for भूमिपः). — c) D1 G2 M2 प्रजा. Da क्लिष्यति; D4 कृत्स्ना तु; G1 क्लिश्नादि (for क्लिश्नाति). K4 G1 योगेन; K5 [अ]धर्मेण; Ca [अ]योगेन (as in text). V1 प्रजां निगृह्णियाद्योगेन (hypermetric); D8 प्रजाः क्षापत्यो योगेन (sic). — d) K2.4 प्रविश(K4 °शं)ति; K3 B1–5 Da Dn D2–7 T G M2.4 प्रवर्तेत; V1 Bo प्रवर्तति; D1 प्रवेशस्तु; D8 प्रवर्तते; M1.3 वर्तेतेथ (for प्रविश्यति). T2 यदा (for तदा). D1 कलेः. K5 तत्र वै वर्तते कलिः.

19 a) K3.5 Bo.1.4.5 D2.3.5.7.8 T G भूयिष्ठो; V1 भूयिष्ठे (for °ष्ठं). — b) K3.5 V1 B1–3.5 D T G न (D4 नु) क्वचित्; B4 कुत्रचित् (for तु क्वचित्). — d) K1 स्वधर्माश्; K4 °र्माश्; D1 स्वधर्मः (for °र्माच्). D1 पश्यते; M1.3 चलते (for च्यवते).

20 a) K1 D2.4.6 भैक्ष्येण; K5 भक्ष्येन. B2 वर्तते; Da वर्तंति (for जीवन्ति). — b) D8 परिधार्यया (for °चर्यया). — c) Da D4 योगक्षेमश्च (for °क्षेम-स्य). D7 T G2–4 M नाशाच्च (for नाशश्च). G1 योगक्षेमच्यवाताच्च (sic). — d) B1 जायते; D1 वर्णते (for वर्तते). Bo धर्मसंकरः (for वर्ण°). D7 T1 G3.4 वर्तते वर्णसंकराः; T2 वर्णसंकर इष्यते.

21 b) T2 G1 न भवंति गुणान्युत; M2 भवंत्यगुण-वंत्युत. — c) T2 G1 न सुखायंते (for नसुखाः सर्वे). — d) B1 मायिनस्; Ca आमयिनस् (as in text). K2 तदा; K4 D1 सदा (for तथा). T2 G1 फलं-त्यफलिनस्तथा.

22 a) K4 कृशंति; B1 क्रमंति; G1 ह्रस्वंति (for ह्रसन्ति). Ś1 K1.4 D1 हि (for च). — b) T2 G1 -सत्त्व- (for -वर्ण-). K3.5 D2–5 T2 G1 -मनांसि च (for -मनांस्युत). — Bo om. (hapl.) 22^{d}–23^{a}. — d) K1 D4 वागतायुषः; K2.3.5 V1 B1.3.5 Da Dn D3.5.6 M2 च गता°; K4 चामिता°; D1 च पिता°; D7 T2 G2–4 चाशता°; D8 आगता°; T1 M1.3.4 वाशता°; G1 च शता° (for चागता°).

23 Bo om. 23^{a} (cf. v. l. 22). — a) T2 विवि-धाश् (for विधवाश्). — V1 reads 23^{b}–25^{d} on marg. — b) D2.3.5 भवते; D8 जीयते (for जायते). K2 D4.6–8 S (except T1 G1 M2) प्रजाः. — c) B1 पर्यन्यः.

24 V1 reads 24 on marg. — a) K4 रसा; D1 रसः. Ś1 K1.2.4 D1 लयं (for क्षयं). D4 याति. — b) Ś1 K1.4 चेच्छति; B1 नेच्छंति. B1 भूमिपाः; M4 भूपतिः. T2 G1 न संरक्षति भूमिपः. — c) K1 M1 संरक्षितं; D7 T1 G3.4 °क्षिताः; D8 स रक्षितुं. — d) K5 B1 दंडनीतिं; D7 T1 G M1.3 °नीत्या; T2 °नीत्याः (for °नीति-). K4 -समाहिताः; D7.8 -सम-न्वितः (for -समाहितः).

25 = 5. 130. 16. V1 reads 25 on marg. — a) K4 -युगश्रेष्टा; D3 (marg. as in text).5 °श्रेष्टं; D4 -युगस्येष्ट; D6.7 G1 (before corr. as in text) -युगे स्रष्टा; D8 -युगं श्रद्धा (for -युगस्रष्टा). — b) K1 D2 G1.2 M1.3 त्रेतायां (for °या). Da त्रेता द्वापर एव च. — c) D2.8 तु (for च).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 2694
B. 12. 69. 99
K. 12. 69. 26

कृतस्य करणाद्राजा स्वर्गमत्यन्तमश्नुते ।
त्रेतायाः करणाद्राजा स्वर्गं नात्यन्तमश्नुते ॥ २६
प्रवर्तनाद्द्वापरस्य यथाभागमुपाश्नुते ।
कलेः प्रवर्तनाद्राजा पापमत्यन्तमश्नुते ॥ २७
ततो वसति दुष्कर्मा नरके शाश्वतीः समाः ।
प्रजानां कल्मषे मग्नोऽकीर्तिं पापं च विन्दति ॥ २८
दण्डनीतिं पुरस्कृत्य विजानन्क्षत्रियः सदा ।
अनवाप्तं च लिप्सेत लब्धं च परिपालयेत् ॥ २९
लोकस्य सीमन्तकरी मर्यादा लोकभावनी ।
सम्यङ्नीता दण्डनीतिर्यथा माता यथा पिता ॥ ३०
यस्यां भवन्ति भूतानि तद्विद्धि भरतर्षभ ।
एष एव परो धर्मो यद्राजा दण्डनीतिमान् ॥ ३१
तस्मात्कौरव्य धर्मेण प्रजाः पालय नीतिमान् ।
एवंवृत्तः प्रजा रक्षन्स्वर्गं जेतासि दुर्जयम् ॥ ३२

इति श्रीमहाभारते शान्तिपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥

---

26 = (var.) 5. 130. 17^{abcd}. — ^{a}) K5 G1. 2 M1. 3 कारणाद् (for कर°). — ^{b}) Ś1 सुखम् (for स्वर्गम्). Bo. 4 अक्षयम्; D6 अभ्यंतम् (for अत्यन्तम्). — K3 Da1 D7 om. (hapl.) 26^{cd}. Da2 D8 om. (hapl.) 26^{c}–27^{d}. Ś1 reads 26^{cd} on marg. — ^{c}) Dn2 D4. 6 G1. 2 M1. 3 कारणाद् (for कर°). — ^{d}) Ś1 K1 D1 अत्यंतम्; Dn1 नानंत्यम् (for नात्यन्तम्).

27 27^{ab} = 5. 130. 17^{ef}. K1 (hapl.) Da2 D8 om. 27 (for Da2 D8, cf. v. l. 26). B2 om. (hapl.) 27^{ab}. V1 reads 27 on marg. — ^{b}) B1 समश्नुते. — ^{c}) K4 कलिः; D1 G1 काले; D2 कालेः. V1 आवर्तनाद् (for प्रवर्त°).

28 28^{ab} = 5. 130. 18^{ab}. — ^{a}) Bo T2 भवति (for वसति). D8 दुष्टात्मा; T2 दुष्कीर्तिः (for दुष्कर्मा). — ^{b}) K3 D4 नरकान् (for नरके). K4 D1 शाश्वती. K4 समा. — ^{c}) K3 D4 कल्मखे. — ^{d}) K1 [ऽ]कीर्तिः. M4 पापां. D5 om. from न्दति up to मर्या (in 30^{b}). — After 28, T2 ins.:

170* दण्डनीतिं पुरस्कृत्य यदा राजा प्रशास्ति ।

— D7 T1 G M2 ins. after 28: T2 after 170*:

171* योगक्षेमाः प्रवर्तन्ते प्रजानां नात्र संशयः ।

29 D5 om. 29 (cf. v. l. 28). — ^{a}) Da1 D6. 8 दंडनीति. — ^{b}) Ś1 विज्ञानन्; K1 विज्ञानं; Dn2 विज्ञानः; D4 विज्ञान; D8 निर्भयः (for विजानन्). — After 29^{ab}, D4 ins.:

172* परिपाल्याः प्रजाः सम्यगिह प्रेत्य च कामदाः ।

— ^{c}) K4 D1 अनावाप्तं. K1 D2 लिंप्सेत; D1 लिप्सते; D4 लिप्स्यत. — ^{d}) D8 लब्धे (for लब्धं).

— For 29^{bcd}, D7 S subst.:

173* क्षत्रियेण विजानता ।
लिप्सितव्यमलब्धं च लब्धं रक्ष्यं च भारत ।

[(L. 1) G1 क्षत्रधर्मेण जानता. — (L. 2) D7 G1. 3 अलभ्यं (for अलब्धं). G1 M1. 3 लक्ष्यं (for रक्ष्यं).]

30 D5 om. up to मर्या (cf. v. l. 28). G2 om. 30^{a}–31^{b}. — ^{a}) Ś1 K1–3 D1. 4. 8 Ca सीमांत°; D6 सीमंति° (for सीमन्तकरी). — ^{b}) K5 V1 B1–5 Dn D1. 3. 5. 6 -भाविनी; D7 -पावनी; T2 G1 -भामिनी (for -भावनी). — ^{c}) D8 भीता (for नीता). — ^{d}) Dn तथा (for the second यथा). K4 पितः.

31 G2 om. 31^{ab} (cf. v. l. 30). — ^{a}) V1 B1 यस्या. Da D1. 8 भवति (for भवन्ति). — ^{b}) D8 तां (for तद्). K3. 5 V1 Bo. 1. 3. 5 Da Dn D2–6 मनुज-र्षभ; B4 मनुजाधिप (for भरतर्षभ). — ^{d}) V1 (m as in text) नीतिदंडवान्. B1 -नीतिवत्; B4 (m as in text) -नीतिवान्.

32 K2 B4 G1 om. (hapl.) 32^{ab}. Ś1 V1 read 32^{ab} on marg. — ^{a}) B2 कौरव. D7 T G2–4 तस्मा-द्धर्मेण कौरव्य. — ^{c}) G2 -वृत्तिः (for -वृत्तः). — ^{d}) D1 K4 स्वर्ग-; D8 स्वर्गा- (for स्वर्गं). K5 गंता; D1 णेता (for जेता). T2 G1 सुदुर्जयं; G2 [अ]सि दुर्जयः (for [अ]सि दुर्जयम्).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७१

युधिष्ठिर उवाच ।

केन वृत्तेन वृत्तज्ञ वर्तमानो महीपतिः ।
सुखेनार्थान्सुखोदर्कानिह च प्रेत्य चाप्नुयात् ॥ १

भीष्म उवाच ।

इयं गुणानां षट्त्रिंशत्षट्त्रिंशद्गुणसंयुता ।
यान्गुणांस्तु गुणोपेतः कुर्वन्गुणमवाप्नुयात् ॥ २
चरेद्धर्मानकटुको मुञ्चेत्स्नेहं न नास्तिकः ।
अनृशंसश्चरेदर्थं चरेत्काममनुद्धतः ॥ ३
प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी स्यात्प्रगल्भः स्यादनिष्ठुरः ॥ ४
संदधीत न चानार्यैर्विगृह्णीयान्न बन्धुभिः ।
नानाप्तैः कारयेच्चारं कुर्यात्कार्यमपीडया ॥ ५
अर्थान्ब्रूयान्न चासत्सु गुणान्ब्रूयान्न चात्मनः ।
आदद्यान्न च साधुभ्यो नासत्पुरुषमाश्रयेत् ॥ ६
नापरीक्ष्य नयेद्दण्डं न च मन्त्रं प्रकाशयेत् ।
विसृजेन्न च लुब्धेभ्यो विश्वसेन्नापकारिषु ॥ ७ C. 12. 2707 B. 12. 70. 7 K. 12. 70. 7

Colophon. — *Sub-parvan:* Ś$_1$ K V$_1$ B Da Dn D$_{1-3.5-7}$ T G$_{1.2.4}$ M राजधर्म. — *Adhy. name:* D$_4$ कृतयुगादिकथनं; D$_7$ T$_1$ G$_{2.4}$ दंडनीतिप्रशंसा; M$_{1.3}$ कालकारणकथनं; M$_2$ युगकारणत्वकथनं. — *Adhy. no.* (figures, words or both): K$_5$ D$_7$ S 71; B$_{1-3}$ Da$_2$ Dn 69; B$_4$ D$_{2.8}$ 68.

71

1 D$_8$ om. the ref. — ^{a}) Ś$_1$ V$_1$ वृत्तिज्ञ; D$_1$ M$_2$ वृत्त(D$_1$ °त्ते)ज्ञा. — ^{b}) D$_3$ M$_3$ वर्तमाना. — ^{c}) M सुखानार्थान्. K$_4$ दुःखोदर्कान्. — ^{d}) K$_4$ चाप्रेत्य. D$_7$ T G M$_{1.3}$ चाश्नुते (for चाप्नुयात्). M$_{2.4}$ इह प्रेत्य समश्नुते.

2 D$_8$ om. the ref. — ^{a}) V$_1$ B D (except D$_{1.4.7.8}$) अयं (for इयं). V$_1$ B$_{2.4}$ Da$_1$ षट्त्रिंशः; B$_1$ गुणवान्; D$_7$ T$_1$ G Cv षट्त्रिंशी. — ^{b}) B$_1$ यस् (for षट्-). Da -विंशद्- (for -त्रिंशद्-). K$_{2-4}$ V$_1$ B Da Dn D$_{2-6.8}$ -संयुतः (D$_8$ °तं) (for -संयुता). D$_7$ S षट्त्रिंशति(T$_1$ G$_1$ °च्च)गुणान्विता. — ^{c}) B$_1$ सा[षा]-ड्गुण्यस् (for यान्गुणांस्). K$_{3.5}$ M$_2$ च; D$_4$ तान्; G$_1$ स (for तु). D$_{4.8}$ M$_{1.3.4}$ गुणोपेतान् (D$_8$ °ताः). — ^{d}) B$_1$ lacuna; M$_{1.3.4}$ सुखम् (for गुणम्).

3 ^{a}) D$_4$ (also as in text) वरेद् (for चरेद्). D$_7$ T G धर्मं. D$_7$ T$_1$ G$_{2-4}$ नरः कोपं; D$_8$ G$_1$ M$_{1.8}$ न-कटुको; Ca अकटुको (as in text). — ^{b}) D$_1$ मुंचत्; D$_{2.3.5}$ युंजन् (D$_2$ °त्) (for मुञ्चेत्). D$_8$ lacuna; K$_1$ स्नेहा; D$_7$ G$_{2.8}$ कोपं (for स्नेहं). K$_5$ च; D$_8$ lacuna (for न). K$_{2.3}$ B$_5$ Dn$_1$ चास्तिकः; K$_5$ D$_8$ नास्तिके; Ca नास्तिकः (as in text). — ^{c}) D$_7$ T G नानृशंसश्; D$_3$ आनृशंस्य. T$_2$ M$_2$ धर्मं (for अर्थं). — ^{d}) M$_4$ चरत्. Da अतंद्रितः; G$_1$ अनुद्धताः; Ca °द्धतः (as in text).

4 = Hitopadeśa III. 100. — ^{a}) D$_7$ T$_1$ G$_{2-4}$ नकृपणः; M$_{1.3}$ अकृपणं; Ca °पणः (as in text). — ^{b}) D$_2$ अधिकत्थनः; D$_7$ T$_1$ G$_{2-4}$ नवि°; G$_1$ अवि-कर्तनः; Ca °त्थनः (as in text). — ^{c}) Ś$_1$ K$_{1.4}$ D$_1$ च पात्रवर्षी (for नापात्र°). D$_2$ दांतानां पात्रवर्षी स्यात्.

5 ^{a}) K$_1$ D$_{1.2}$ वा (for च). — ^{b}) K$_4$ D$_1$ निगृ-ह्णीयान्; Ca विगृ° (as in text). D$_6$ न बंधुकः; D$_7$ S च शत्रुभिः (for न बन्धुभिः). — ^{c}) K$_5$ V$_1$ B$_{0.2-4}$ Da Dn D$_{2.3.5.6}$ नाभक्तं; B$_{1.5}$ नायुक्तं (for नानाप्तैः). K$_{1.4}$ D$_1$ कारयेश्; K$_{2.5}$ V$_1$ B Da Dn D$_{2-7}$ S चार-येच्; D$_8$ चावरेच् (for कारयेच्). — ^{d}) B$_{1.5}$ D$_8$ अपीडयन्; D$_7$ S न (M$_{1.3}$ अ-) लीलया (for अपीडया). — After 5, the sequence in D$_7$ S is: 11^{ab}, 10^{cd}, 10^{ab}, 11^{cd}.

6 ^{ab}) K$_1$ अर्थां; K$_{2.3}$ V$_1$ B Da Dn D$_{2.3.5.6}$ Ca अर्थं; M$_4$ अस्मान्. B$_1$ चारेषु (for चासत्सु). D$_1$ गुधात्मानः (for न चा°). D$_8$ अर्थानर्थान्ब्रूयान्नाचासगुणान्ब्रू-**चात्मनः (sic). — ^{c}) Ś$_1$ K$_4$ D$_1$ M$_2$ आदध्यान्; Da आदित्यान्; D$_6$ आदधीन्. S (except G$_2$) transp. न and च. — ^{d}) M$_4$ आश्रये.

7 Ś$_1$ D$_1$ om. (hapl.) 7^{ab}; K$_1$ reads it on marg. — ^{a}) B$_1$ D$_6$ G$_1$ नापरीक्षन् (B$_1$ °रीक्ष्यं); D$_3$ °रीक्षाश्. B$_1$ न चेद्; D$_8$ चरेद् (for नयेद्). — ^{b}) M$_{1.3}$ नव- (for न च). — ^{c}) D$_1$ लब्धेभ्यो. — ^{d}) K$_5$ नार्थकारिषु (for नाप°).

8 ^{a}) = (var.) 5. 38. 10^a. K$_3$ G$_1$ M$_4$ अनीर्ष्युर्; D$_{2.3.5}$ अ(D$_5$ आ)नार्यै; D$_7$ T$_1$ G$_{3.4}$ अनीर्ष्यो (for

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 2708 B. 12. 70. 8 K. 12. 70. 8

अनीर्षुर्गुप्तदारः स्याच्चोक्षः स्यादघृणी नृपः ।
स्त्रियं सेवेत नात्यर्थं मृष्टं भुञ्जीत नाहितम् ॥ ८
अस्तब्धः पूजयेन्मान्यान्गुरून्सेवेदमायया ।
अर्चेद्देवान्नदम्भेन श्रियमिच्छेदकुत्सिताम् ॥ ९
सेवेत प्रणयं हित्वा दक्षः स्यान्न त्वकालवित् ।
सान्त्वयेन्न च भोगार्थमनुगृह्णन्न चाक्षिपेत् ॥ १०
प्रहरेन्न त्वविज्ञाय हत्वा शत्रून्न शेषयेत् ।
क्रोधं कुर्यान्न चाकस्मान्मृदुः स्यान्नापकारिषु ॥ ११
एवं चरस्व राज्यस्थो यदि श्रेय इहेच्छसि ।
अतोऽन्यथा नरपतिर्भयमृच्छत्यनुत्तमम् ॥ १२
इति सर्वान्गुणानेतान्यथोक्तान्योऽनुवर्तते ।
अनुभूयेह भद्राणि प्रेत्य स्वर्गे महीयते ॥ १३

वैशंपायन उवाच ।

इदं वचः शांतनवस्य शुश्रुवा-
न्युधिष्ठिरः पाण्डवमुख्यसंवृतः ।
तदा ववन्दे च पितामहं नृपो
यथोक्तमेतच्च चकार बुद्धिमान् ॥ १४

इति श्रीमहाभारते शान्तिपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥

अनीर्षुर्). D1 गुप्तचारः. — b) Ś1 K1. 4 D1. 3. 5 दक्षः; K3 B2. 4 D8 M1. 3. 4 चौक्षः; D4 G2 चोग्रः; D7 T1 G3. 4 नोग्रः (for चोक्षः). Ś1 M1. 3 च घृणी; D1 च गुणी; D4 G2 M4 न(D4 ना)घृणी; D8 अघृणो; T2 नघृणिर् (for अघृणी). K1 नृप; M2 नरः. B1 अघृणी च सदा नृपः. — c) K3. 5 V1 B (except B2) Da2 Dn D2–6 S स्त्रियः; D8 स्त्रीषु. K2 नात्यंतं (for नात्यर्थं). D7 स्त्रीः सेवेत न चात्यर्थं. — d) K1 मिष्टं (for मृष्टं). M1 भुंजत. K4 वाहितं (for नाहितम्). — After 8, Dn2 reads 12.

9 a) D5 अस्तवः; D8 अलुब्धः; T2 G1 अंतस्थः (for अस्तब्धः). Dn2 पूजयन्. B1 नान्यान्. — b) B1 Dn1 D8 गुरुं. G3 सगुरून्वेदमायया. — c) K1–3. 5 V1 B D (except D1. 8) G4 M1. 3 अदंभेन; T1 G3 M2. 4 न(T1 G3 अ)डंभेन; G2 अमीतेन (for नदम्भेन). — d) D2. 3. 5 अगुत्सि(D2 °प्सि)तां; D4. 8 G2 M2 अकुत्सितात् (D8 °तान्; M2 °तः).

10 For the sequence in D7 S, cf. v. l. 5. — b) G1. 2 त्वकालवत्. D8 दक्षस्यंत * कालवित् (sic). — K3 om. 10^{cd}. — c) K2 D8 मोघार्थं; K5 V1 B2–4 Da D2. 3. 5. 6 T2 G1 M मोघाय (M2 °यान्); Bo. 5 Dn D4 मोक्षाय; D7 T1 G2–4 शत्रूंश्च (for भोगार्थम्). B1 शांत्वयद्ध च मुह्येच्च. — d) Ś1 K1 D2. 4 अनु(K1 °न्व)गृह्णन्; D7 T G गृह्णीयान्नैव; M [अ]नु(M2 न)-गृह्णीयान्न (for अनुगृह्णन्न). V1 B (except B3) Da Dn क्षिपेत्; D2. 3. 5 द्विषेत् (for [आ]क्षिपेत्).

11 K5 om. 11^{ab}. For the sequence in D7 S, cf. v. l. 5. — a) K3 प्रहरन्न; D8 प्रहरेत. K3 Da T2 त्ववज्ञाय. — b) D1 कृत्वा (for हत्वा). K1 भाषयेत्; K2 V1 B (except B1. 2) Da Dn D2. 3. 5. 6 शोचयेत् (for शेष°). D8 हत्वा शत्रुमशेषयेत्. —K3 om. 11^{cd}. — c) D7 T1 G2–4 च न (by transp.); M4 न वा. — d) D1 (also as in text) M4 मृत्युः (for मृदुः). Dn2 om. न. K1. 5 D4. 7. 8 S नापराधिषु.

12 Dn2 reads 12 after 8. — a) K4 एवं चर सुराजस्थो. — c) M2 कुतो (for अतो). — d) Ś1 आर्च्छति; K1. 2. 4 V1 B5 Da Dn D1. 6 अर्च्छति; Bo. 3. 4 D2. 3. 5 अभ्येति; D7 T1 G3 M1. 3 इच्छति; G2 गच्छति (for ऋच्छति). D8 भयमत्यंतमश्नुते.

13 a) K3 D6 सर्व-; Da सर्वा (for सर्वान्). D8 गुणोपेतान् (for गुणाने°). — b) B4 partly damaged. K3. 5 D4. 8 M2. 4 om. यो. K1 D4 [ऽ]नुवर्त्यं वै (for °र्तते). — c) D2 अनुभूय ह (for °येह). — d) D8 M1 महीपते; Ca °यते (as in text).

14 K2. 4 D1 om. 14 with the ref. D8 om. the ref. — a) D4 शांतवनस्य; D8 शीतनवस्य. M1–3 श्रुत्वा; Ca शुश्रुवान् (as in text). — b) D2 पांडवं; D7 T G1. 3. 4 M1. 3 पार्थिव (for पाण्डव-). B1 -संयुतः D8 (for -संवृतः). — c) T2 G2 तथा (for तदा). — d) om. च. Da पितामहो नृप (for °हं नृपो). — d) Bo. 3. 4 D2. 3. 5 एवेह; D7 T1 G1. 3. 4 M एवं च (for एतच्च). M4 चचार.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७२

युधिष्ठिर उवाच ।
कथं राजा प्रजा रक्षन्नाधिबन्धेन युज्यते ।
धर्मे च नापराध्नोति तन्मे ब्रूहि पितामह ॥ १
भीष्म उवाच ।
समासेनैव ते तात धर्मान्वक्ष्यामि निश्चितान् ।
विस्तरेण हि धर्माणां न जात्वन्तमवाप्नुयात् ॥ २
धर्मनिष्ठाञ्श्रुतवतो वेदव्रतसमाहितान् ।
अर्चितान्वासयेथास्त्वं गृहे गुणवतो द्विजान् ॥ ३
प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च ।
अथ सर्वाणि कुर्वीथाः कार्याणि सपुरोहितः ॥ ४
धर्मकार्याणि निर्वर्त्य मङ्गलानि प्रयुज्य च ।
ब्राह्मणान्वाचयेथास्त्वमर्थसिद्धिजयाशिषः ॥ ५
आर्जवेन च संपन्नो धृत्या बुद्ध्या च भारत ।
अर्थार्थं परिगृह्णीयात्कामक्रोधौ च वर्जयेत् ॥ ६ C. 12. 2720 B. 12. 71. 6 K. 12. 71. 6

Colophon. — *Sub-parvan:* Ś1 K V1 B Da Dn D1-3. 5-7 T G1. 2. 4 M राजधर्म. — *Adhy. name:* D4 षट्त्रिंशद्राजगुणाः; D7 T1 G2. 4 षट्त्रिंशद्गुणकथनं; M1. 3 राजवृत्तं; M2 अनेकगुणकथनं. — *Adhy. no.* (figures, words or both): K5 71 (as in text); B1. 3. 4 D2. 8 69; Dn 70; D7 S 72. — *Śloka no.:* Dn1 D8 14; Dn2 15.

72

☞ A few stanzas from this adhy. are quoted in parts in the Old-Javanese Version at the end of the Bhīṣmaparvan. See Introduction to the Bhīṣmaparvan, pp. LXXXVIII-LXXXIX. In the Crit. App. of this adhy., the citations listed in the Bhīṣmaparvan (App. II, pp. 752-753) are quoted under O-J.

1 D8 om. the ref. — [ab]) B2 एवं (for कथं). V1 प्रजां. K5 नाधिपत्येन; B1 °पस्तेन; D7 T1 G2. 3 नातिबंधेन; D8 नो त्वबंधेन; T2 G1. 4 M ना(T2 अ)-नु° (for नाधि°). O-J कथं राजा वर्तमानो न तु बन्धेन युज्यते. — [c]) V1 B2 धर्मं च; B0 D2. 8 धर्मे न (D8 °ण) (for धर्मे च). K5 V1 B1. 2 Da Dn2 D6 नापराध्येत (for °ध्नोति). T2 G1 M गच्छेद्धर्मस्य चानृण्यं. — [d]) K1 तं मे; B1 ततो (for तन्मे).

2 D8 om. the ref. — [a]) D4 [इ]व (for [ए]व). V1 B Da Dn D2. 3. 5. 6 राजन् (for तात). — [b]) D8 तस्माद् (for धर्मान्). K2 ते हितान्; K3. 5 V1 B D (except D1. 7) M2 शाश्वतान् (D4 °तात्) (for निश्चि°). — [c]) K2 V1 B1. 2. 5 Da Dn [ए]व; B0. 3. 4 D2. 3. 5 च; D6 [इ]व; G1 M1. 3 [इ]ह (for हि).

3 [a]) K1 धर्मनिष्ठां; Da1 D3 धर्मानिष्ठान्; D6 M4 धर्मनित्यान्; G1 धर्मनिष्ठात्. O-J राजधर्मश्रुतिवतः. — [b]) K1. 4 Da Dn D2. 3. 5. 6 देवव्रत-; D4 वेदब्रह्म-; D7 T G1. 3. 4 वेद(T2 G देव)वृत्त-; D8 वेदशास्त्र-; G2 वेदवित्त- (for °व्रत-). D1 -समाहितं. O-J शीलव्रतसमन्वितः. — [c]) K4 V1 B Da Dn D2. 3. 5. 6 अर्चयित्वा यतेथास्त्वं (B0 यथेष्टस्त्वं; B1 यतींस्त्वं हि; Dn D2. 3. 5. 6 यजेथास्त्वं); D1 अर्चिताद्या स ययास्त्वं (sic); D8 अर्चितां स्थापयेथास्त्वं; O-J अर्चित[ता]न्वयतेत त्वं (sic). — [d]) K1 (marg.) ग्रहे. O-J येन यः स्युः पुरोहितः (sic).

4 [a]) K1 प्रत्युक्ताय. — [c]) Ś1 D1 कुर्वैथाः. — [d]) D1. 6 सु- (for स-).

5 [a]) K1 धर्मकर्माणि. D1 निवर्त्यं. — [b]) Da G1 संगल्या(G1 °ळा)नि; Ca मङ्गलानि (as in text). B2 प्रगृह्य (for प्रयुज्य). — [c]) T2 G1 वाचयेत्स्वार्थम् (for °येथास्त्वम्). — [d]) D2. 7 T G1. 3. 4 M1. 3 अर्थसिद्धिं; D4. 6 °सिद्धिर्; D3 °वृद्धि-. K4 अर्थसिद्धमशेषतः.

6 [a]) G2 [ए]व (for च). D3 संयुक्तो (for संपन्नो). — [b]) K5 D4 transp. धृत्या and बुद्ध्या. V1 B3. 4 Da D2. 3 (m as in text). 5 वृत्त्या (for धृत्या). — [c]) K1. 4. 5 V1 B Da Dn D1-3. 5. 6 य(D1 अ)थार्थं; K3 अर्थाश्च; D7 S धर्मार्थौ; O-J धर्मार्तौ (for अर्थार्थं). K5 V1 B Da Dn D2. 3. 5-7 T2 G1 M1. 3 प्रतिगृह्णीयात् (M1. 3 °याः); O-J परिपृच्छयन्. — D3 om. (hapl.) 6[d]. — [d]) B1 नियम्य च; D7 S (except T2 M2. 4) विवर्जयेत्; D3 च वर्जयन्. O-J रागद्वेषौ विहाय च.

7 [a]) B1 कामं क्रोधं; O-J कामदोषौ (v. l. °द्वेषौ). — [b]) D6. 8 तु (for [अ]नु-). O-J यो मा राजा प्रन-

CC-0. In Public Domain. Gurukul Kangri Collection, Harid...

C.12.2721 B.12.71.7 K.12.71.7 कामक्रोधौ पुरस्कृत्य योऽर्थं राजानुतिष्ठति ।
न स धर्मं न चाप्यर्थं परिगृह्णाति बालिशः ॥ ७
मा स्म लुब्धांश्च मूर्खांश्च कामे चार्थेषु यूयुजः ।
अलुब्धान्बुद्धिसंपन्नान्सर्वकर्मसु योजयेत् ॥ ८
मूर्खो ह्यधिकृतोऽर्थेषु कार्याणामविशारदः ।
प्रजाः क्लिश्नात्ययोगेन कामद्वेषसमन्वितः ॥ ९
बलिषष्ठेन शुल्केन दण्डेनाथापराधिनाम् ।
शास्त्रनीतेन लिप्सेथा वेतनेन धनागमम् ॥ १०
दापयित्वा करं धर्म्यं राष्ट्रं नित्यं यथाविधि ।
अशेषान्कल्पयेद्राजा योगक्षेमानतन्द्रितः ॥ ११
गोपायितारं दातारं धर्मनित्यमतन्द्रितम् ।
अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः ॥ १२
मा स्माधर्मेण लाभेन लिप्सेथास्त्वं धनागमम् ।
धर्मार्थावध्रुवौ तस्य योऽपशास्त्रपरो भवेत् ॥ १३

श्यति. — c) K3 G2 M4 O-J च (for स). V1 धर्मान्. Da1 तथाप्यर्थं; D8 lacuna; M4 न चात्यर्थं; O-J न चात्मानं. — d) K1-3 V1 B D (except D1. 4. 8) T G प्रतिगृह्णाति. M2. 4 भूमिपः; Ca बालिशः (as in text). O-J शक्नोति परिरक्षितुं. B4 repeats 7–9 after 12.

8 For the repetition of 8 in B4, cf. v. l. 7. K1 D4 transp. 8 and 9. — a) D1 मांस- (for मा स्म). D8 लुब्धं (for लुब्धांश्च). K3 D4 मूर्षांश्च; B2 मूढांश्च (for मूर्खांश्च). T1 G1 मा स्म मूर्खांश्च लुब्धांश्च; O-J तस्मान्मूढश्च लुब्धश्च. — b) K1. 3 D4 कामा(K1 मा क)-दर्थेषु यूयुजः; K5 V1 Bo. 2–5 Da Dn D2. 3. 5. 6 कामार्थेषु (Dn D6 °र्थे च) प्रयूयुजः (K5 °युज्यते; V1 °युंयुजः; D2. 3. 5 °युंजतः); B1 कामांधांश्च प्रपूजयेत्; D1 कामाश्चार्थे* योजये; D7 S कामादर्थेषु योजयेत्; D8 कामादर्थे सुपूजयन्; O-J न कर्तव्यः कदाचन. — c) D6 वृद्धि- (for बुद्धि-). K3. 5 O-J अलुब्धं बुद्धिसंपन्नं. — d) D8 -चर्यासु; O-J -कार्येषु (for -कर्मसु). K4 V1 Bo D1 योजयेः; O-J योजयेत् (as in text).

9 For the repetition of 8 in B4, cf. v. l. 7. K1 D4 transp. 8 and 9. — a) D2 मूर्खा; D4 मूर्षो. K2. 4 D1 यदि (for ह्यधि-). K4 D1. 8 -कृतार्थेषु (for -कृतो°). — c) V1 Da प्रजां. K4 क्लिश्नातु; D8 G1 क्लिश्नाति. K1 योगेन (for [अ]यो°). — d) V1 B D (except D1. 4. 7. 8) कामक्रोध-; M1 °द्वेषः.

10 a) Ś1 K2. 4 बलिषड्केन; V1 बलिं षष्टेन; B1 बलिं कष्टेन; D1 बलिषंकेन (sic); Ca बलषड्केन (for बलिषष्ठेन). K1 D1 G1 शुष्केन; K5 B3 Dn D6. 8 Ca शुक्लेन; B2 D2. 4 शुक्तेन (for शुल्केन). — b) D3. 5 [अ]पि (for [अ]थ). Ś1 K4 दंडेनाथापराधिनः (K4 °ना); Bo. 3–5 D2. 3 m °नार्था(B4 °र्थो)पहारिणा (Bo. 5 °णः); B2 °न वावरोधिनां; D8 °नाप्यपराधितं. Ca cites दण्डेन (as in text) and अविरोधिनः. — c) K2. 3 B Dn D2. 3. 5. 6 शास्त्रानीतेन; Ca शास्त्रदृष्टेन. Da लिप्येथा; D7 m तेनैव; G1 लिप्सेथ; Ca लिप्सीथाः (sic). Cv शस्त्रभीतेन लिप्सेथा. — d) D1 वेतरेन. M2 धनागमः. — After 10, T2 G1 read 13cd, repeating it in its proper place.

11 a) D7 T G करान्धर्म्यान् (for करं धर्म्यं). D8 दापापिदात्मनं धर्मं (corrupt). — b) V1 दंड-; B1 शास्त्रं; Da D4 राष्ट्र-; D7 T G M1. 2 राष्ट्रान्; M4 राष्ट्रे. K1. 4 V1 B Da Dn D2. 3. 5. 6 नी(Dn2 नि)त्या (for नित्यं). D8 मन्यंते धर्मकोविदाः. — c) K2 Dn D6 तथैतं; K3. 5 V1 Bo. 5 Da D7. 8 S अथैषां (T2 G1 °तान्); B1. 3. 4 अ(B1 य)थैतं; B2 यथैषां; D2. 3. 5 अथैनं; D4 एतेषां (अशेषान्). — d) K2. 3. 5 V1 B Da Dn1 D2–8 S योगक्षेमम्. D1 योगं क्षेमान्. K3. 4 अतंद्रितं. Dn2 कामक्रोधविवर्जितः.

12 a) D1 गोपायतारं. D8 गोपितारं दधातारं; O-J गोपं हितं हि राजानं. — b) D8 धर्मं नित्यं; O-J धर्मनित्यं (as in text). K5 B1 D8 अतंद्रितः; Dn2 अतींद्रियं; O-J अतन्द्रितं (as in text). — c) M2 -दोष- (for -द्वेष-). O-J as in text. — d) K3 अनुरक्षति; K4 D1 G1 °रज्यंत; D7 °रंजति. O-J उपरज्यंति मानवाः. — After 12, B4 repeats 7–9.

13 a) D7 T G M1. 3 तस्माद् (for मा स्म). K2 T1 G2–4 M1. 3 [अ]धर्म्येण; B1. 4 D1. 3. 7 T2 G1 धर्मेण (for [अ]ध°). K1. 3–5 V1 Bo–3. 5 Dn D2–6. 8 लोभेन; B4 लुब्धेन (for लाभेन). Da मा स्मालोभेनालोभेन; — b) D1 धर्मेण; M2. 4 मा धर्म्येण च ला(M4 लो)भेन. T2 G1 read लिप्सेर्वा; G1 लप्सेथास्. B1 धनागतं. — c) D7 T1 13cd for the first time after 10. — c) K (except K4) G2–4 च ध्रुवौ (for अध्रुवौ). — d) K (except K4) V1 Bo. 2–5 Da Dn D2–6 न शास्त्रपरो (D4 °धनो) D7 S (for ऽपशास्त्र°). B1 न शास्त्रमधिगच्छति; D8 योपि (G1 M °प-) शास्त्रधनो भवेत् (M1. 3 नृप); corrupt.

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपशास्त्रपरो राजा संचयान्नाधिगच्छति ।
अस्थाने चास्य तद्वित्तं सर्वमेव विनश्यति ॥ १४
अर्थमूलोऽपहिंसां च कुरुते स्वयमात्मनः ।
करैरशास्त्रदृष्टैर्हि मोहात्संपीडयन्प्रजाः ॥ १५
ऊधश्छिन्द्याद्धि यो धेन्वाः क्षीरार्थी न लभेत्पयः ।
एवं राष्ट्रमयोगेन पीडितं न विवर्धते ॥ १६
यो हि दोग्ध्रीमुपास्ते तु स नित्यं लभते पयः ।
एवं राष्ट्रमुपायेन भुञ्जानो लभते फलम् ॥ १७
अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितम् ।
जनयत्यतुलां नित्यं कोशवृद्धिं युधिष्ठिर ॥ १८
दोग्धि धान्यं हिरण्यं च प्रजा राज्ञि सुरक्षिता ।
नित्यं स्वेभ्यः परेभ्यश्च तृप्ता माता यथा पयः ॥ १९
मालाकारोपमो राजन्भव माङ्गारिकोपमः ।
तथा युक्तश्चिरं राष्ट्रं भोक्तुं शक्यसि पालयन् ॥ २०
परचक्राभियानेन यदि ते स्याद्धनक्षयः ।
अथ साम्नैव लिप्सेथा धनमब्राह्मणेषु यत् ॥ २१ C. 12. 2735 B. 12. 71. 21 K. 12. 71. 21

14 Dn2 transp. 14 and 15. — a) K1 D2.3.5.6 अथ; K5 V1 B अप्य-; Da Dn अर्थ- (for अप-). K3.5 D7 S -शास्त्रधनो; D4.8 °धरो (for °परो). — b) K1 संबंधान्; K4 D7 S संचयं; V1 B2 Da संशयान्; Bo.3–5 Dn D2.3.5.6 धर्मार्थान्; B1 संशयं; D8 संचया (for संचयान्). K3.5 यो; B1 च; B2 Da lacuna (for न). — c) D4 वा (for च).

15 Dn2 transp. 14 and 15. — a) D7 S अर्थमू- (T2 G1 °स्मिन्मू)लं (for °मूलो). K1.5 V1 Bo.2–5 Da Dn D6.8 [ऽ]पि हिंसां; B1 D2.3.5.7 T1 G3.4 M हि हिंसां; T2 G1 च हिंसां; G2 अहिंसां (for ऽपहिंसां). O-J स्ववृत्तिमूलहिंसो [v. l. °मूलां हिंसां] यः. — b) O-J कुरुते स्वयमेव हि. — c) K4 D7 अशास्त्रदृष्टो (D7 °दुष्टैर्); Dn2 अदृष्टशास्त्रं (for अशास्त्रदृष्टैर्). O-J अशास्त्रलक्षणाकारैर्. — d) D7 S लोभात् (for मोहात्). Ś1 K1.2.4 V1 Bo.5 संपीडयेत् (K1 °येन्) (for °यन्). D1 मोहात्मस्मीडयोत्प्रजाः (corrupt); D8 मोहान्स पीडयत्प्रजाः (sic); O-J लोभाद्यैः पीडयन्प्रजाः.

16 D2 om. 16^{a}–17^{b}. — a) K1 ऊर्धश्. Ca cites ऊधः. K3.5 V1 B Da Dn D3.5.6 तु; D4 च (for हि). G4 M4 धेनोः (for धेन्वाः). T2 G1 ऊधश्च पीडयन्धे(G1 °येद्धे)न्वाः. — b) D4 दुग्धार्थी (for क्षीरार्थी). V1 लभते (for न लभेत्). D4 om. न. — For 16^{ab}, O-J subst.:

174* यो हि पक्वं द्रुमं छिद्य लभते न पुनः फलम् ।

— D1 repeats (hapl.) 16^{c}–17^{c} after 17^{c}. — c) O-J as in text. — d) D3.5 M4 पीडयन्. B4 D7 T1 G2–4 न च (B4 प्र-) वर्धते; M4 नाभिव°; O-J स्यादनर्थकं. — After 16, D7 S ins.:

175* यवसोदकमादाय सान्त्वेन विनयेन च ।

17 D2 om. 17^{ab} (cf. v. l. 16). — a) K3 V1 B2.5 Da Dn D6.7 T G M1.3 च; Bo [ऽ]त्र; B1 स; D3.4 नु (for तु). M2.4 उपासीत. — b) K3 V1 B2.3.5 Da Dn D3.5–7 T G M1.3.4 विंदते; M2 पिबते (for लभते). — c) D1 अयोगेन (for उपायेन). — After 17^{c}, D1 repeats 16^{c}–17^{c}. B1 om. (hapl.) 17^{d}–18^{a}. M2 reads (hapl.) 17^{d} after 18^{a}. — d) D4 भुंजाना. K3.5 D4.8 M1.3.4 विंदते; M2 [ऽ]पि न ते (for लभते).

18 B1 om. 18^{a} (cf. v. l. 17). After 18^{a}, M2 reads 17^{d}. — a) B5 एवं (for अथ). — b) D6 भज्यमानं. — c) D6 जनयसि. K4 [उ]त्तमां (for [अ]तुलां). — d) V1 B D3.5 कोपवृ(D3 °मृ)द्धिं; D2.6 कोशमृद्धिं. D5.6 युधिष्ठिरः.

19 a) K2.3 V1 B (except B1) D (except D1.4.8) S दोग्ध्री (D2 °ग्धीं). K3.5 हि (for च). — b) K2.4 V1 B D (except D1.4.8) S मही (for प्रजा). All MSS. (except Ś1 K1.4 D1) राज्ञा (for राज्ञि). B1 च रक्षिता; D4 सुरक्षितः. — d) K5 सा गौर् (for माता).

20 With 20^{ab}, cf. 5. 34. 18^{cd}. — a) O-J मालाकारोपमो नित्यं. — b) T2 G3 M2 [अं]गारकोपमः; M1.3 °रिकोपमं. Ca cites आङ्गारिकः. B1 भव मांगलिकोपमः; D7 भुवमां(marg. भवानां)गारि°. O-J as in text. — c) D4 यथा (for तथा). G2 युक्तं. Da Dn D6 राज्यं; T2 G1 राजा (for राष्ट्रं). — d) T2 G1 राष्ट्रं (for भोक्तुं). K V1 B (except B1) Da Dn D1.3–7 शक्ष्यसि; D3 शक्नोति; T2 G1 भोक्ष्यति (for शक्यसि). D2 पालयत्.

21 K1 reads 21 on marg. (*sec. m.*). — a) K4 परं; G1.3 परि-; G4 परश् (for पर-). K3 D4 -योगेन; B1 D3 -पातेन; D7 T1 G3.4 -धानेन (for -यानेन). — b) D2 वा; D3 च (for ते). Ś1 K2.4 D1 धनंजयः; D2.8 वनक्षयः (for धन°). — c) B1 तस्मा (for

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 2736 B. 12. 71. 22 K. 12. 71. 22 मा स्म ते ब्राह्मणं दृष्ट्वा धनस्थं प्रचलेन्मनः ।
अन्त्यायामप्यवस्थायां किमु स्फीतस्य भारत ॥ २२
धनानि तेभ्यो दद्यास्त्वं यथाशक्ति यथार्हतः ।
सान्त्वयन्परिरक्षंश्च स्वर्गमाप्स्यसि दुर्जयम् ॥ २३
एवं धर्मेण वृत्तेन प्रजास्त्वं परिपालयन् ।
स्वन्तं पुण्यं यशोवन्तं प्राप्स्यसे कुरुनन्दन ॥ २४
धर्मेण व्यवहारेण प्रजाः पालय पाण्डव ।
युधिष्ठिर तथा युक्तो नाधिबन्धेन योक्ष्यसे ॥ २५

एष एव परो धर्मो यद्राजा रक्षते प्रजाः ।
भूतानां हि यथा धर्मे रक्षणं च परा दया ॥ २६
तस्मादेवं परं धर्मं मन्यन्ते धर्मकोविदाः ।
यद्राजा रक्षणे युक्तो भूतेषु कुरुते दयाम् ॥ २७
यदह्ना कुरुते पापमरक्षन्भयतः प्रजाः ।
राजा वर्षसहस्रेण तस्यान्तमधिगच्छति ॥ २८
यदह्ना कुरुते पुण्यं प्रजा धर्मेण पालयन् ।
दश वर्षसहस्राणि तस्य भुङ्क्ते फलं दिवि ॥ २९

अथ). Ś1 D1 साम्नेव. —^{d}) Bo. 5 तत्; D8 च (for यत्). T2 G1 न धनं ब्राह्मणेपि (G1 °णे तु) यत्.

22 ^{a}) K4 D4 ब्राह्मणान्. —^{b}) K5 धनस्थान्; V1 धर्मस्थान्; G2 धनिनं. Ś1 K4 D1 प्रचरेन्. —^{d}) G1 पीतस्य (for स्फीतस्य).

23 ^{a}) K4 दानामि (for धनानि). B1. 2 यस्य (for तेभ्यो). K5 निःस्वेभ्यस्त्वं धनं दद्याद्. —^{c}) V1 B1. 2 शांत्वयन्; D6 सांत्वयत्; D8 सा स्वयं. Ś1 K1. 4. 5 D1 परिरक्ष्यं(D1 °क्ष्या)श्च. —^{d}) B1 यास्यति; D7 T G M1. 3 एष्यसि (T2 °ति); M2 प्राप्स्यसि. D8 भारत (for दुर्जयम्).

24 ^{a}) Ś1 K4 B4. 5 T G3. 4 M2 धर्म्येण. —^{b}) K5 V1 B Da Dn D1–7 T G परिपालय (D1 °येत्). D8 प्रजाः सम्यक्प्रपालयन्. —^{c}) D4 om. (hapl.) from स्वन्तं up to पालय (in 25^{b}). K4 स्वंते; B1 सुतं; B4 स्वं तु; D2. 3. 7 T G3. 4 M1. 3 स्वर्गं; D5 स्वर्गः; D8 स्वंकं; G1. 2 M2. 4 स्वर्ग्यं (for स्वन्तं). D3. 5 पुण्य- (for पुण्यं). K3 D7 S यशोनंतं (M1. 3 °स्यं); K5 V1 B Da Dn D2. 3. 5. 6 यशो नित्यं (for यशोवन्तं). —^{d}) Dn2 प्राप्स्यते.

25 D4 om. up to पालय (cf. v. l. 24). —^{a}) Ś1 B3. 5 D1 T G1. 3. 4 M2 धर्म्येण. —^{b}) K4 Dn1 D6 प्रजां. —^{c}) Ś1 Dn D6 यथा (for तथा). —^{d}) D7 T1 G2. 3 नाति-; D8 नाव-; T2 G1 न तु; G4 M नातु- (for नाधि-). K1 -धर्मेण (marg. -बंध्येन) (for -बन्धेन). Ś1 K4 योज्यसे; D1 युज्यसे; D6 मोक्षसे (for योक्ष्यसे).

26 ^{a}) O-J एष एष. —^{b}) T2 G1 यादृशा; O-J यद्राजा (as in text). K2 D1 रक्ष्यते; K3. 5 V1 B Da Dn D2–8 S O-J रक्षति. —^{c}) Ś1 K1. 2. 4 D1 च (for हि). K3. 5 Da D4. 7. 8 T G1. 3. 4 M2 O-J दया (D4 also परो); V1 B Dn D2. 3. 5. 6 G2 M1. 3. 4 यदा (for यथा). Ś1 धर्मो; O-J धर्मे (as in text). —^{d}) K3 V1 B Da Dn D6 परमा; K4 च परं; K5 D4. 8 हि परा; D1 स्व प्रदा-; D2. 3. 5 परमं (for च परा). M2 जया (for दया). D7 T G3. 4 M1. 3. 4 रक्षणं हि (M3. 4 च) दया परा; G1. 2 रक्षणं (G2 रक्षणे) हि यदा पुरा; O-J रक्षणे च परा दया. —Between 26 and 29, O-J ins.:

176* इह लोके सुखं प्राप्य परत्र च महीतले ।
एवं तेभ्यः परच्चेतो(sic) ब्राह्मणेभ्यो यथाविधि ।
सत्त्वेन परिभोगाय स्वर्गं जेष्यसि दुर्जयम् ।

27 ^{a}) K4 एनं; Dn1 एव; D1 एतं; D7 S (except G1) एतत् (for एवं). —^{b}) K1 मंस्यंते; D8 मन्यते. —^{c}) K1. 3 V1 B Dn D2. 3. 5. 6 यो राजा; Da योंतरा; T2 G1 यादृशा (for यद्राजा). D8 युद्धे; T2 G1 तात (for युक्तो).

28 ^{a}) K1 अह्ना यत् (by transp.); K2 D1 अह्नाय. —^{b}) B1 भवतः; Da कुरुते (for भयतः). K4 B5 D1 अरक्षं(D1 °क्ष)त यतः प्रजाः. —^{c}) K1 D1 प्रजा; G1 राजन् (for राजा). K3. 5 वर्षसहस्रेषु; D2 °स्राणि; M2 °स्रं तं. — D2 om. (hapl.) 28^{d}–29^{c}. —^{d}) D7 S माधि- (for अधि-).

29 D2 om. 29^{abc} (cf. v. l. 28). —^{a}) K3. 5 V1 B D (except D1. 4. 7; D2 om.) T2 G1 M धर्मं (for पुण्यं). — D8 om. (hapl.) 29^{c}–30^{d}. Ś1 reads 29^{c}–31^{b} on marg. (*sec. m.*). V1 reads 29^{c}–30^{d} on marg. —^{d}) D1 न्यस्य (for तस्य). D1 भुंक्षे (for भुङ्क्ते). K5 यथाविधि; M1. 3 फलं महत् (for फलं दिवि). — For 29, O-J subst.:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

खिष्टिः स्वधीतिः सुतपा लोकाञ्जयति यावतः ।
क्षणेन तानवाप्नोति प्रजा धर्मेण पालयन् ॥ ३०
एवं धर्मं प्रयत्नेन कौन्तेय परिपालयन् ।
इह पुण्यफलं लब्ध्वा नाधिबन्धेन योक्ष्यसे ॥ ३१
स्वर्गलोके च महतीं श्रियं प्राप्स्यसि पाण्डव ।
असंभवश्च धर्माणामीदृशानामराजसु ।
तस्माद्राजैव नान्योऽस्ति यो महत्फलमाप्नुयात् ॥ ३२
स राज्यमृद्धिमत्प्राप्य धर्मेण परिपालयन् ।
इन्द्रं तर्पय सोमेन कामैश्च सुहृदो जनान् ॥ ३३

इति श्रीमहाभारते शान्तिपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

भीष्म उवाच ।
य एव तु सतो रक्षेदसतश्च निबर्हयेत् ।
स एव राज्ञा कर्तव्यो राजन्राजपुरोहितः ॥ १
अत्राप्युदाहरन्तीममितिहासं पुरातनम् । C. 12. 2750 B. 12. 72. 2 K. 12. 72. 3

177* यदा न कुरुते धर्मं राजा भूतानि पालयन् ।
प्रजापुण्यं चतुर्भागं तदा न प्राप्नुयान्नृपः ।

30 D8 om. 30 (cf. v. l. 29). Ś1 (*sec. m.*) V1 read 30 on marg. — [a]) B1 स्विष्टीः; Da स्विष्टेः; D7 T1 G2–4 M2. 4 स्विष्टः; G1 M1. 3 स्विष्ट-; Ca खिष्टिः (as in text). K1 lacuna; B1 D4 स्वधीती; Da सुधानी; D7 S (except T2) स्वधीतः (M1. 3 °ति-). Cv स्विष्टं स्वधीतं सुतपा. — [b]) D1 लोकं. D7 यजति (for जयति). D2 यावता. — [d]) D7 T G लोकान् (for प्रजा). D1 पालयेत्.

31 Ś1 reads 31[ab] on marg. (*sec. m.*). — [a]) D1 एव; M4 एतं (for एवं). V1 B1. 2 Da धर्मान्. — [b]) K (except K1) V1 B D (except D1. 4. 8) T G M4 परिपालय. — K1 om. (hapl.) 31[c]–33[b]. — [c]) K5 V1 B D (except D1. 4. 7. 8) त(Dn1 य)तः (for इह). D8 पुष्पं (for पुण्य-). — [d]) D7 S नानु-; D8 नावि- (for नाधि-). D2 मोक्षसे; D3 योक्षसे; D8 G2 योक्ष्य(D8 °क्ष)ते. V1 B1 Da दिवं धर्मेण भोक्ष्यसे.

32 K1 om. 32 (cf. v. l. 31). — [a]) B3 D3. 5. 7 S स्वर्गे (for स्वर्ग-). K2. 3. 5 V1 B2. 4. 5 Da Dn D6 -लोके सु-; B0. 1. 3 -लोकेषु; D8 -लोकं च; T2 G1. 2 M1–8 च लोके (for -लोके च). — [c]) D7 S अविप्लवश्च (M4 °वोयं) धर्माणाम्. — [d]) D7 T1 G1. 3. 4 M4 ईदृशो नाम राजसु. — [e]) K4 राजेव; D4 राजे च. T2 तस्माद्राज्ञा विनान्योस्ति. — [f]) K5 V1 B D (except D1. 4. 7. 8) धर्म- (for महत्). D4 अवाप्नुयात् (hypermetric) (for आप्नु°).

33 K1 om. 33[ab] (cf. v. l. 31). — [a]) K2 धृतिमत्; K3. 5 D4 M2. 4 ऋद्धं सं-; V1 B Da Dn D2 धृतिमान् (for ऋद्धिमत्). D3 स राज्यवृद्धिमल्लाप्य (sic). — [b]) K3 V1 Dn D6 परिपालय; D3 प्रतिपालयन्. D7 S प्रजा धर्मेण पालय (M1. 3 °यन्). — [c]) K1 कामेन; D4 सोमैश्च; Ca सोमेन (as in text). — [d]) T2 G1 कामेन (for कामैश्च). Ś1 D4 जनाः; Ś1 (*sup. lin. sec. m.*) नृप; K1 जयः; B (except B2) D2. 3. 8 गणान् (for जनान्). D1 कामेच्च सुखदे जनान् (sic).

Colophon. — *Sub-parvan:* Ś1 K V1 B Da Dn D1–7 T G1. 2. 4 M राजधर्म. — *Adhy. name:* D4 राजधर्मोपदेशः; D7 T1 G2–4 रक्षणविधिः; M1. 3 रक्षाप्रकारः; M2 यथाशास्त्रलिप्साविधिः. — *Adhy. no.* (figures, words or both): K5 D7 S 73; B1. 3. 4 Dn2 D2. 3 70; Da 72 (as in text); Dn1 71. — *Śloka no.:* Da Dn1 34; D8 24.

73

1 Before 1, D7 S ins.:

178* युधिष्ठिर उवाच ।
कीदृशो ब्राह्मणो राज्ञां कार्याकार्यविचारणे ।
क्षमः कर्तुं समर्थो वा तन्मे ब्रूहि पितामह ।

[(L. 1) G2 कार्यकारणचारणे (for the post. half).]

— [a]) V1 K3–5 D2–6. 8 एवं (for एव). K3. 5 D4 हि (for तु). D4 रक्ष्येद्. — [b]) V1 B Da Dn D2. 3. 5. 6 G2 M2 निवर्तयेत् (for निबर्ह°). — [c]) E1 एवं.

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 2750 B. 12. 72. 2 K. 12. 72. 3 पुरूरवस ऐलस्य संवादं मातरिश्वनः ॥ २

ऐल उवाच ।

कुतः स्विद्ब्राह्मणो जातो वर्णाश्चापि कुतस्त्रयः ।
कस्माच्च भवति श्रेयानेतद्वायो विचक्ष्व मे ॥ ३

वायुरुवाच ।

ब्रह्मणो मुखतः सृष्टो ब्राह्मणो राजसत्तम ।
बाहुभ्यां क्षत्रियः सृष्ट ऊरुभ्यां वैश्य उच्यते ॥ ४
वर्णानां परिचर्यार्थं त्रयाणां पुरुषर्षभ ।
वर्णश्चतुर्थः पश्चात्तु पद्भ्यां शूद्रो विनिर्मितः ॥ ५
ब्राह्मणो जातमात्रस्तु पृथिवीमन्वजायत ।
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ॥ ६
ततः पृथिव्या गोप्तारं क्षत्रियं दण्डधारिणम् ।
द्वितीयं वर्णमकरोत्प्रजानामनुगुप्तये ॥ ७
वैश्यस्तु धनधान्येन त्रीन्वर्णान्बिभृयादिमान् ।
शूद्रो ह्येनान्परिचरेदिति ब्रह्मानुशासनम् ॥ ८

ऐल उवाच ।

द्विजस्य क्षत्रबन्धोर्वा कस्येयं पृथिवी भवेत् ।
धर्मतः सह वित्तेन सम्यग्वायो प्रचक्ष्व मे ॥ ९

Ś1 K5 D1.4.6 राजा; K1 राजन् (for राज्ञा). — ^{d}) K1 राजा (for राजन्). Ś1 K1.4 D1.4.8 -पुरोहितैः. M मंत्री (M2 °त्रि-) शास्त्रविशारदः.

2 ^{a}) Ś1 K1 (marg. as in text).4 ऐडस्य; D1 चेदस्य; D4 मेडस्य; S ऐलस्य. — ^{d}) K1.4 B1 D2.3.5.7.8 S (except G2 M3) मातरिश्वना.

3 D8 M2 om. the ref. Ś1 K1–4 D4 ऐ(K1 ए)ड; B2 Da Dn D6 पुरूरवा; D1 ऐंद्र; T G M1.3.4 ऐळ (for ऐल). — ^{a}) K5 G1 कुतश्चिद्; M1.3 कुतस्विन् (for कुतः स्विद्). K1 D4 ब्राह्मणा. K1 जाता. — ^{b}) D7 T G वा(T2 G2 चा)थ (for चापि). K1 ततस् (for कुतस्). — ^{c}) Ś1 V1 D1 कस्माच्चिद्; D2.3.5 कस्मात्तद्; D4 क एषां; M4 तस्माच्च (for कस्माच्च). K1 श्रेयम्; V1 Bo. 1.3–5 Dn D2.3.5.6 श्रेष्ठः; B2 Da D4.8 श्रेयः (for श्रेयान्). — ^{d}) D8 -वीर्या (for वायो). D7 S प्रचक्ष्व; D8 विचक्ष. B Da Dn D2.3.5.6 तन्मे व्याख्यातुमर्हसि.

4 K2 V1 B Da Dn2 D2.3.5.6.8 मातरिश्वा (for वायुर्). — ^{a}) K2.3.5 B Da Dn1 D1.5.7 T G M2 ब्राह्मणे; V1 ब्रह्मणा; D6 ब्राह्मणा. K1 D1 सृष्टा (D1 °ष्टो); M4 सृष्टेः (for सृष्टो). — ^{b}) K1.5 Bo Da Dn1 D7 T G3.4 ब्रह्मणो; K3 ब्राह्मणा; B1–5 D1.3–5 G2 M2 ब्रह्मणा. — ^{c}) D8 बाहुभ्यां क्षत्रियाः सृष्टा. — ^{d}) Ś1 K4 [अ]प्यूरुभ्यां (for ऊरुभ्यां). K5 V1 B Da Dn D2.3.5.7 G3 एव च (for उच्यते).

5 ^{a}) Dn2 D6 परिहारा(D6 °र्या)र्थं. — ^{b}) K3.5 V1 B D (except D1) S भरतर्षभ (for पुरुष°). — ^{c}) G1 वर्णे चतुर्थे. K3 पद्भ्यां च; K5 V1 B1.2 Da Dn D6 संभूतः (for पश्चात्तु). — ^{d}) K3 शूद्रः पश्चाद्; D4.7 S (except G1) शूद्रः पद्भ्यां (by transp.). K1 m V1 B Da D2.3.5 विनिर्गतः.

6 = (var) Manu. 1. 99. — ^{a}) D4 ब्राह्मणा; G1 (before corr.) ब्राह्मणे. V1 B D2.3.5.7 T G जायमानो; D6 तापमानो (for जातमात्रस्). K5 V1 Bo. 2–5 D (except D1; Da lacuna) S हि; B1 [अ]पि (for तु). — ^{b}) B1–4 Da T2 G2 पृथिव्याम् (for °वीम्). K3 Da Ca अधिजायते; B2.4 अध्यजायत; T2 अभ्य°; G1 अन्य° (for अन्व°). K5 V1 Bo.5 Dn D2.3.5.6 पृथिव्यामनुजायते; D8 पृथिवीसर्वजासतत (sic). — ^{c}) T2 G1 °धर्माणां; M °वर्णानां (for °भूतानां). — ^{d}) K1 धर्मकामस्य; V1 B Da D3.5 धर्म(V1 कर्म-; Bo सर्व)-कोषस्य. — After 6, D7 S ins.:

179* सर्वस्वं ब्राह्मणस्येदं यत्किंचिदिह दृश्यते ।
धर्मयुक्तं प्रशस्तं च जगत्यस्मिन्नृपात्मज ।

[(L. 2) T2 G1 धर्मे (for धर्म-). T2 G1 प्रसक्तं; M2.4 प्रशस्यं (for प्रशस्तं). T2 G1 नृपात्मजः.]

7 V1 om. 7^{ab}. — ^{a}) B (except B1) D (except D1.4.7.8) अतः (for ततः). K4.5 D2.3 पृथिव्यां. B Da Dn D2.3.5.6 यंतारं; D8 गांधारं (for गोप्तारं). — ^{b}) K3.5 D4.7 T G दंडधारकं; B Da Dn D2.3.5.6 °धार(Bo °रि)णे; D8 °धारणं. V1 reads 7^{cd} on marg. — ^{c}) D6 क्षत्रियं (for द्वितीयं). V1 Dn D6 दंडम्; D8 धर्मम् (for वर्णम्). — ^{d}) T2 G1 इह (for अनु-). Dn1 D8 -तृप्तये; D1 -गोप्तये (for -गुप्तये).

8 ^{b}) D8 om. वर्णान्. — ^{c}) D4 शूद्रे. K (except K3) D4.8 [अ]पि; B3 तु (for हि). K (except K4) B1.4 Da Dn D1.4.6.8 T2 G1 M [ए]तान् (for

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वायुरुवाच ।

विप्रस्य सर्वमेवैतद्यत्किंचिज्जगतीगतम् ।
ज्येष्ठेनाभिजनेनेह तद्धर्मकुशला विदुः ॥ १०
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
गुरुर्हि सर्ववर्णानां ज्येष्ठः श्रेष्ठश्च वै द्विजः ॥ ११
पत्यभावे यथा स्त्री हि देवरं कुरुते पतिम् ।
आनन्तर्यात्तथा क्षत्रं पृथिवी कुरुते पतिम् ॥ १२
एष ते प्रथमः कल्प आपद्यन्यो भवेदतः ।
यदि स्वर्गे परं स्थानं धर्मतः परिमार्गसि ॥ १३
यः कश्चिद्विजयेद्भूमिं ब्राह्मणाय निवेदयेत् ।
श्रुतवृत्तोपपन्नाय धर्मज्ञाय तपस्विने ॥ १४
स्वधर्मपरितृप्ताय यो न वित्तपरो भवेत् ।
यो राजानं नयेद्बुद्ध्या सर्वतः परिपूर्णया ॥ १५
ब्राह्मणो हि कुले जातः कृतप्रज्ञो विनीतवाक् ।
श्रेयो नयति राजानं ब्रुवंश्चित्रां सरस्वतीम् ॥ १६
राजा चरति यं धर्मं ब्राह्मणेन निदर्शितम् ।
शुश्रूषुरनहंवादी क्षत्रधर्मव्रते स्थितः ॥ १७
तावता स कृतप्रज्ञश्चिरं यशसि तिष्ठति । C. 12. 2765 B. 12. 72. 17 K. 12. 72. 20

[ए]नान्). — ^{d}) K_3 D_4 धर्मानुशासनं.

9 D_8 om. 9. $Ś_1$ K_1 एड; K_{2-4} D_4 ऐड; D_1 ऐंद्र; S (except T_1) ऐळ (for ऐल). — D_4 repeats 9^{ab} after the ref. of 10. — ^{a}) D_4 (both times) क्षत्रं (for क्षत्र·). — ^{b}) V_1 यस्येयं (for कस्येयं). $B_{0.5}$ मता (for भवेत्). — ^{c}) V_1 स हि (for सह). Bo वृत्तेन; G_1 चित्तेन (for वित्तेन). — ^{d}) K_4 प्रचक्ष मे; Da_1 प्रचक्रमे; D_2 प्रवक्ष्व मे; D_6 प्रवक्ष्यसे.

10 With 10, cf. Manu. 1. 100. D_8 om. the ref. Dn_2 मातरिश्व (for वायुर्). After the ref., D_4 repeats 9^{ab}. — ^{a}) B_1 प्रविश्य (for विप्रस्य). M_4 [इ]दं (for [ए]तद्). — After 10^{ab}, D_7 S ins.:

180* धनं धान्यं हिरण्यं च स्त्रियो रत्नानि वाहनम् ।
मङ्गलं च प्रशस्तं च यच्चान्यदपि विद्यते ।

[(L. 2) D_7 T G M_{2-4} मंगळं. T_2 वर्तते (for विद्यते).] — ^{c}) $K_{3.5}$ D_4 श्रैष्ठ्ये(K_5 D_4 °ष्ठे)न; G_1 ज्यैष्ठ्येन. — ^{d}) T_1 $G_{3.4}$ तं धर्मं (for तद्धर्म·).

11 11^{ab} = Manu. 1. 101^{ab}. — ^{a}) G_1 स्वमेवं. — ^{b}) D_6 वस्तं; Ca वस्ते (as in text). — ^{c}) D_1 गुरुं. $Ś_1$ $K_{1.4}$ D_2 च (for हि). B_4 D_8 सर्वभूतानां. — ^{d}) D_8 स (for च). $K_{3.4}$ द्विज. M श्रेष्ठो ज्येष्ठश्च ब्राह्मणः.

12 With 12, cf. B. 13. 8. 22. — ^{a}) D_7 T_1 G पत्यलाभे; M_2 पतिभावे; Ca पत्यभावे (as in text). $K_{3.5}$ V_1 B D (except $D_{1.4.8}$) S [ए]व स्त्री (for स्त्री हि). — B_3 Dn D_6 om. (hapl.) 12^{cd}. — ^{c}) G_1 आनंतर्यं. D_8 अथ (for तथा). — ^{d}) D_1 परम् (for पतिम्).

13 ^{a}) M वै (for ते). — ^{b}) K_4 G_1 [अ]द्यो (for [अ]न्यो). K_4 D_1 T_2 G_1 ततः; $D_{4.7}$ T_1 $G_{3.4}$ यतः (for अतः). — ^{c}) V_1 B Da Dn $D_{2.3.6.7}$ स्वर्गं; D_1 सर्वो·; $D_{5.8}$ स्वर्गः. — ^{d}) Dn D_6 स्वधर्मं (D_6 °र्मः) (for धर्मतः). D_7 $G_{2.3}$ परिमार्गय; D_8 परमा गतिः; T_2 G_1 $M_{1.3.4}$ परिमार्गति.

14 ^{a}) $K_{3.5}$ V_1 B D (except $D_{1.4.7.8}$) यत्किंचिद् (for यः कश्चिद्). $K_{2.3}$ V_1 B_2 Da Dn D_6 विजये (B_2 Da_1 °येद्); $B_{0.1.3-5}$ $D_{2.3.5}$ जयसे (for विजयेद्). K_5 भूमौ; V_1 $B_{1.2}$ Da_1 भूमेर् (for भूमिं). — ^{b}) V_1 B D (except $D_{1.4.7.8}$) निवेदय; T_2 न्यवेदयेत्. — ^{c}) $Ś_1$ श्रुतवित्तोपपन्नाय; K_1 °वंतोप°. — ^{d}) D_4 विपश्चिते (for तपस्विने).

15 ^{a}) D_1 सुधर्म·. D_7 -वृत्ताय; D_8 -प्राप्ताय (for -तृप्ताय). — ^{b}) $D_{1.6.7}$ ये (for यो). $K_{3.5}$ नि(K_5 न)वृत्तिपरो; B_1 न वेत्ति°; D_6 T_2 न (T_2 नि·) वृत्त°; D_7 न तृप्ति° (for न वित्त°). Ca cites वित्तपरः (as in text). — ^{c}) K_5 transp. यो and राजानं.

16 B_1 om. 16^{ab}. — ^{b}) All MSS. (except $Ś_1$ $K_{1.2.4}$; B_1 om.) विनीतवान्. — ^{c}) D_4 नियति; D_8 न याति (for नयति). — ^{d}) $D_{1.3.5}$ ध्रुवंश् (sic) (for ब्रुवंश्).

17 ^{a}) B_1 D_1 G_1 यद् (for यं). K_1 (m as in text) ब्रह्म. — ^{b}) K_1 निवेदितं; B_2 Da प्रदर्शितं; D_2 निदर्शतं; $D_{4.6.7}$ T G_{2-4} विदर्शितं. — ^{c}) $Ś_1$ अनहंवादे; B (except B_2) $D_{2.3.5}$ °हंकारी. — ^{d}) $D_{2.3.5}$ क्षत्रधर्म(D_2 °र्मे)रतः स्थितः; D_8 °धर्मरते स्थितः; M_4 क्षत्रधर्ममनुव्रतः.

18 ^{a}) D_7 T_1 G_{2-4} यावता. D_8 कृतः (for कृत·). $K_{4.5}$ V_1 B Da Dn $D_{2.3.5.6}$ तावता सत्कृत(K_4 D_8

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C. 12. 2766 B. 12. 72. 18 K. 12. 72. 21

तस्य धर्मस्य सर्वस्य भागी राजपुरोहितः ॥ १८
एवमेव प्रजाः सर्वा राजानमभिसंश्रिताः ।
सम्यग्वृत्ताः स्वधर्मस्था न कुतश्चिद्भयान्विताः ॥ १९
राष्ट्रे चरन्ति यं धर्मं राज्ञा साध्वभिरक्षिताः ।
चतुर्थं तस्य धर्मस्य राजा भागं स विन्दति ॥ २०
देवा मनुष्याः पितरो गन्धर्वोरगराक्षसाः ।
यज्ञमेवोपजीवन्ति नास्ति चेष्टमराजके ॥ २१
इतो दत्तेन जीवन्ति देवताः पितरस्तथा ।
राजन्येवास्य धर्मस्य योगक्षेमः प्रतिष्ठितः ॥ २२
छायायामप्सु वायौ च सुखमुष्णेऽधिगच्छति ।
अग्नौ वाससि सूर्ये च सुखं शीतेऽधिगच्छति ॥ २३
शब्दे स्पर्शे रसे रूपे गन्धे च रमते मनः ।
तेषु भोगेषु सर्वेषु नभीतो लभते सुखम् ॥ २४
अभयस्यैव यो दाता तस्यैव सुमहत्फलम् ।
न हि प्राणसमं दानं त्रिषु लोकेषु विद्यते ॥ २५
इन्द्रो राजा यमो राजा धर्मो राजा तथैव च ।
राजा बिभर्ति रूपाणि राज्ञा सर्वमिदं धृतम् ॥ २६

इति श्रीमहाभारते शान्तिपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

°तः)प्रा(K_5 °प्र)ज्ञश्. — ^{b}) D_7 T G चरन्ध(D_7 $G_{1,2}$ चिरं ध)र्मेच तिष्ठते (G_2 °ति). — ^{c}) $K_{3,5}$ तस्माद् (for तस्य). D_8 कृष्णस्य (for सर्वस्य). $D_{2,3,5,7}$ G तस्य सर्वस्य धर्मस्य. — ^{d}) $K_{3,5}$ D_4 राजन् ; G_1 भाग्य· (for भागी). $K_{3,5}$ D_4 भागी ; $D_{3,5,8}$ राजा (for राज·).

19 ^{b}) B_2 अपि (for अभि·). G_1 ·संस्थिताः (for ·संश्रिताः). — After 19^{ab}, D_7 S (except G_1) ins. :

181* ब्राह्मणं च सुविद्वांसं राजशास्त्रविपश्चितम् ।

[$M_{3,4}$ ब्राह्मणश् (for ब्राह्मणं).]

— B_1 om. (hapl.) 19^{cd}. — ^{c}) M_4 स्वकर्मस्था. — ^{d}) D_8 नकुलश्चिद्. K_1 भयान्वितः.

20 ^{a}) D_4 राष्ट्रं. B_1 चरति. B_1 T_2 G_1 M_{1-3} यद् (for यं). D_6 धर्मे. — ^{b}) K_3 Da राजा (for राज्ञा). M [अ]त्र (for [अ]भि·). D_4 ·रक्षितः. — V_1 reads 20^{c}–21^{e} on marg. — ^{c}) G_2 तद्धर्मं (for धर्मस्य). — ^{d}) B Da Dn D_6 तु ; D_7 S (except T_2) हि (for स). V_1 देवतात्रितयस्तथा.

21 V_1 reads 21^{abc} on marg. — ^{a}) D_6 देवामे· तस्या पितरो (sic). — ^{c}) K_4 जीवंती. — ^{d}) D_7 S (except $M_{1,3}$) यष्टा ह्यराजके.

22 ^{a}) K_4 यतो ; D_1 इत्ये ; D_6 तत्रो (for इतो). K_1 *स्तेन ; D_8 दंतेन (for दत्तेन). — ^{b}) K_4 देवतः ; D_8 देवता. — ^{c}) $Ś_1$ $K_{1,4}$ राजन्ये(K_4 °न्या)वास्य ; D_4 राजन् यज्ञस्य (for राजन्येवास्य). D_1 राजन्ये चास्य धर्मस्य. — ^{d}) T_2 योगः क्षेमः ; G_1 योगक्षेमं. M प्रवर्तते (for प्रतिष्ठितः). B_1 योगक्षेमपरायणः.

